BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PANDITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R T H GRIFFITH, M A, C I E

AND

G THIBAUT, PH D

No 101

बोधसारः ।

श्रीविद्वद्वर्यनरहरिविरचितः ।

तच्छिष्यश्रीदिवाकरकृतयाऽर्थदीप्त्या सहितः ।

श्रीमदुदासीनवर्यस्वामिगोविन्दानन्दशिष्येण

दयानन्दस्वामिना परिशोधित ।

BODHASÂR,

A TREATISE ON VEDANTA,

BY

ŜRI NARHARI,

With a commentary by the author's pupil

PANDIT DIVAKAR

EDITED BY

SWAMÎ DAYANAND

Fasciculus V

BENARES

Published by the Proprietors Messrs Braj B Das & Co,

AND SOLD BY H D GUPTA

Secretary, Chowkhamba Sanskrit Book Depot

Printed at the Vidyâ Vilâs Press,

BENARES

1905

सूचीपत्रम् ।

गणपाठ	०	४	
गोलप्रकाश	२	८	०
गंगालहरी	०	१	०
गुरुसारणी	०	४	०
जातकतत्त्वम्	०	१२	०
तत्त्वदीप	०	१	०
तर्कसंग्रह.	०	१	६
दत्तकमीमांसा	०	८	०
धर्म्मशास्त्रसंग्रह	०	१	६
धातुपाठ (शिला ~))	०	२	०
धातुरूपावली	०	२	०
नैषध चरित नारायणी टीका टाइप	४	०	०
परिभाषापाठ	०	१	०
पाणिनीयशिक्षा भाष्यसहिता	०	२	०
प्रथम परीक्षा	०	२	०
प्रथमपुस्तक हिन्दी	०	१	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
बीजगणितम् (म० म० प० सुधाकरकृतटिप्पणीसहित)	१	८	०
भट्टीकाव्य ५ सर्ग	०	८	०
मनोरमा शब्दरत्नसहिता (टाइप)	९	०	०
लघुकौमुदी टिप्पणीसहिता	०	४	०
लक्षणावली	०	२	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वसिष्ठसिद्धान्त.	०	१	६
वार्तिकपाठ	०	४	०
विष्णुसहस्रनाम	०	१	०
शब्दरूपावली	०	१	६
शृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	०	१	०
सरस्वतीकण्ठाभरणम्	३	०	०
साङ्ख्यचन्द्रिका टिप्पणीसहिता	०	८	०
साङ्ख्यतत्त्वकौमुदी	०	६	०
सिद्धान्तकौमुदी	४	०	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	३	०	०
उपसर्गवृत्ति	०	१	०

सत आत्मस्वरूपस्य वासनाः संस्कारास्ताभिः सुन्दरैः शोभायमानैर्निजभावशुद्धकुसुमैर्निजं स्वीयं आत्मीयो भावस्ता दात्म्यं तेन शुद्धैर्निर्मलैः कुसुमैः पुष्पैः सुमनसा सुष्ठु शोभनं मनोऽन्तःकरणं येषां तेषां निर्मलमनसामित्यर्थः, महेश्वर ईश्वरत्वारोपाधिष्ठानं ब्रह्म सम्पूज्यः सम्यक्पूजनीयः सा सैव धन्यता कृतकृत्यता वर्णिता कथिता शास्त्रेष्विति शेषः, धूपमाह कर्मेति, कर्मज्ञानमयः कर्म क्रिया ज्ञानं शब्दादिविषयो बोधस्तन्मयस्तज्जनको यदिन्द्रियगणो यः प्रसिद्ध इन्द्रियाणां करणानां गणः समूहो दशेन्द्रियाणीत्यर्थः, विरागानले विरागो वैतृष्ण्यं तदेवानलोऽग्निस्तस्मिन् भिन्नः समर्पितश्चेत्तर्हि सोयं प्रसिद्धो ज्ञानिनामस्य प्रत्यगात्मनो देवस्य चिन्मात्ररूपस्य दशाङ्गदाहसुरभिर्दशानां दशसङ्ख्यानामङ्गानामवयवानामिन्द्रियरूपाणामित्यर्थः, दाहो दहनं नाश इत्यर्थः, तेन सुरभिः सुगन्धिः, सदात्मवासनावत्त्वाद्धूपो धूपरूपोपचारः सदा नित्यं वल्लभः प्रियो भवति ॥ ७ ॥

दीपमाह ।

यस्मिन्नुज्ज्वलिते न तिष्ठति तमो बाह्यं न चाभ्यन्तरं
सोयं ज्ञानमयः प्रकाशपरमो दीपः समुज्ज्वाल्यताम् ।
यद्भक्ष्य प्रियमस्य यस्य परमा तृप्तिर्भवेद्भक्षणे
द्वैतं तत्तु निवेदनीयममितं नैवेद्यमत्युत्तमम् ॥ ८ ॥

यस्मिन्निति । यस्मिञ्ज्ञानरूपे दीप उज्ज्वलिते सति प्रज्वालिते सति बाह्यं ब्रह्मविषयं जगत्पदार्थविषयं च तमोऽज्ञानं न तिष्ठति न स्थितिं प्राप्नोति आभ्यन्तरं च प्रत्यगात्मविषयमहङ्कारादिविषयं च तमोऽज्ञानं न तिष्ठति न स्थितिं प्राप्नोति स

उक्तलक्षणो ज्ञानिप्रत्यक्षोऽयं प्रकाशपरमप्रकाशेन श्रेष्ठः 'यस्य भासा सर्वमिदं विभाति, येन सूर्यस्तपति तेजसेद्धः' इत्यादिश्रुतेः, ज्ञानमयो ज्ञानरूपो दीपो दीपयति प्रकाशयति स्वात्मानमिति दीपः समुज्ज्वाल्यतां प्रज्वाल्यतां नैवेद्यमाह यदिति, अस्य विद्वत्प्रत्यक्षस्य देवस्य चिन्मात्ररूपस्यात्मनो यत्प्रसिद्धं भक्ष्यं भक्षितुं योग्यं प्रियमिष्टं भवति यस्य भक्ष्यस्य भक्षणे भोजने कृते सति अस्य देवस्य परमा तृप्तिर्निरङ्कुशाख्या तृप्तिर्भवत्स्यात्तत्तु द्वैतं तदुक्तलक्षणं द्वैतं सर्वं जगत्तुपदेनाज्ञानिप्रजानैवेद्याद्वैति विलक्षणत्वमस्य नैवेद्यस्य सूचनम्, अमितमपरिमितमनन्तमित्यर्थः, एतमेवात्र पूजायां निवेदनीयं समर्पणीयं नैवेद्यं नैवेद्यरूपोपचारमत्युत्तममतिश्रेष्ठं वदन्ति मुनय इति शेषः ॥ ८ ॥

आचमनीयमाह ।

पश्चादाचमनीयमत्र विहितं सद्यो विशुद्धिप्रदं
सन्तोषामृतमेव पूजनविधौ पानीयमानीयताम् ।
यन्मैत्र्यादिचतुष्टयं मुनिमते पातञ्जले वर्णितं
ताम्बूलं वदनप्रमादजनकं देवाग्रतः स्थाप्यताम् ॥ ९ ॥

पश्चादिति । अत्रास्मिन्पूजाविधावात्मशिवस्य पूजाविधाने विहितं योग्यं सद्यस्तत्कालमेव विशुद्धिप्रदं विशुद्धीं रागादिराहित्येन निर्मलतां तां प्रददाति प्रयच्छति तत्तथोक्तं सन्तोषामृतमेव सन्तोषो विषयेषु अलम्बुद्धिस्तदेवामृतं सुखरूपत्वाज्जलं तदेवाचमनीयमाचमनाय हितं पानीयं च प्राशने हितं च, आत्मसुखलाभे सति विषयसुखेच्छाऽभावः स्पूर्णकामत्वाच्च विषयेषु दुःखदर्शनाधिक्याच्च विषयालम्बुद्धिः सन्तोषशब्दार्थः, आनीयतां स्वात्मशिवे समर्प्यतां ताम्बूलमाह यदिति, मुनिमते

मुनीना योगिनां मते विवेकिना च मते मान्ये चित्तवृत्तिनिरोधद्वारा ब्रह्मप्रकत्वात्पातञ्जले पतञ्जलिप्रोक्ते शास्त्रे यत्प्रसिद्ध मैत्र्यादिचतुष्टय मैत्री स्वसमेषु मित्रताऽऽदिर्यासा करुणामुदितोपेक्षाणा तासा चतुष्टय चतुष्क वर्णित कथित तत्तदेव, तत्र च करुणा दया स्वन्यूनेषु जिज्ञासुषु, मुदिता प्रसन्नता स्वाधिक्यदर्शने, उपेक्षोदासीनता स्ववाक्येऽश्रद्धालुषु मूढेषु वदनप्रसादजनक वदन मुखमात्मानन्दभोजनसाधन शुद्धचेत. 'चेतो मुख' इति श्रुते, तस्य प्रसादो निर्मलत्वेन शोभायमानत्व तस्य जनकमुत्पादक लोकेपि ताम्बूलभक्षणस्य मुखशोभाकारित्वप्रसिद्धे, तदेव ताम्बूल देवाग्रतो देवस्यात्मशिवस्याग्रतोऽग्रभागे स्थाप्यतामर्प्यत म, आनन्दानुभवाकारवृत्तिनैर्मल्यमात्मशिवस्य सदास्फुरणविषय यथा तथा क्रियतामिति भाव: ॥ ९ ॥

फलार्पणमाह ।

निष्कामोत्तमधर्मसभ्रमजुषां जन्मावलीनां फल
भक्ति सा परमेश्वरस्य पदयोरावेदनीया मया ।
सर्वस्व मम तत्फलेति स मया क्लृप्तस्य पूजाविधे
पूर्णत्वाय निवेदितो निजमनश्चिन्तामणिर्दक्षिणा ॥ १० ॥

निष्कामेति । निष्कामोत्तमधर्मसभ्रमजुषा निष्कामा कामनारहिता अत एवोत्तमा श्रेष्ठा: ये धर्मा नित्यनैमित्तिककर्माणि तेषु सभ्रम: प्रीत्युल्लासस्त जुषन्ते सेवन्ते तास्तथोक्तास्तासा जन्मावलीनां जन्मनामावल्य: पङ्क्तयस्तासां फल फलरूपाऽनन्तजन्मनां फलभूतेत्यर्थ:, भक्तिरीश्वरचरणविषयकप्रेमरूपा वृत्ति. सा सैव फलरूपत्वेन परमेश्वरस्य परम ईश्वरत्वाधिष्ठानरूपेणातिश्रेष्ठ ईश्वरो ब्रह्माभिन्न: प्रत्यगात्मा तस्य पदयो-

रारोपापवादद्वयाधिष्ठानत्वेन कल्पिताशयोगावेदनीया मया साधिष्ठानबुद्धिस्थचिदाभासरूपेण पूजेकनावेदनीया समर्पणीया तत्रैव सा द्रष्टव्या नात्मनीति भावः, दक्षिणामाह सर्वस्वमिति, मम साधिष्ठानबुद्धिस्थचिदाभासस्य पूजकस्य मे तत्सर्वविवेकिषु प्रत्यक्ष मनः सर्वस्व सर्वजगद्रूप स्व धन किल निश्चयेन निजमनश्चिन्तामणिर्निविज स्वीय मनः सकल्पविकल्पान्त करणवृत्तिरूप तदेव चिन्तामणिश्चिन्तनद्वारा फलप्रदत्वात्स मया क्लृप्तस्य कल्पितस्य पूजाविधे. स्वात्मशिवपूजाविधानस्य पूर्णत्वाय समाप्तिसिद्ध्यर्थमन्यथा पूजाविधानासमाप्तिरेवेति भावः, दक्षिणा दक्षिणोपचारो निवेदितः समर्पितः ॥१०॥

स्तुतिमाह ।

यावन्त्येव भुवा रजांस्यगणितब्रह्माण्डकोटिस्पृशा
तावद्भी रजसा गणैर्गणयितु शक्या गुणा यस्य न ।
त्व तादृग्गुणवास्तथापि मुनिभिर्यन्निर्गुण स्तूयसे
तत्कि स्तौमि महेश हे शिव भवद्रूप विदूर धियाम् ॥११॥

यावन्तीति । ब्रह्माण्डकोटिस्पृशा ब्रह्मणो वस्तुनो ब्रह्मरूपस्य जीवस्य जन्मकारणभूतानि पक्षिणामण्डानीवाण्डानि ब्रह्माण्डानि तेषा कोटयः कोटिसख्या अमितान्यण्डानीत्यर्थ , ताः स्पृशन्तीति तास्तथोक्तास्तेषु ब्रह्माण्डेषु स्थिता इत्यर्थः, तासाम्भुवां पृथ्वीना यावन्त्येव यावत्सख्याकान्येव रजांसि धूलीकणाः सन्ति तावद्भिस्तावत्परिमितै रजसा धूलीकणानाङ्गणै. समूहैर्गणयितु गणना कर्तु यस्य स्वात्मशिवस्य गुणा जगदुत्पादनादिधर्मा न शक्याः शक्या न भवन्ति हे महेश हे ईश्वरत्वाधिष्ठानभूत त्व तादृशा ये गुणा. सत्वरजस्तमोविकारास्ते विद्यन्ते यस्मिंस्त्वयि

तथाविधस्त्वमसि वर्त्तसे तथापि तवेदृशगुणवत्त्वे सत्यपि मुनि-भिर्मननशीलैर्विवेकिभिरित्यर्थः, यद्यतः कारणान्निर्गुणो गुणा-स्पृष्ट एव स्तूयसे प्रतिपाद्यसेऽनुभूयसे तत्ततः कारणाद्धे शिव हे सुखात्मन्नह परिच्छिन्नो जीवो धिया बुद्धिवृत्तीना त्वदू-रमगोचर भवद्रपमुभयमपि तव स्वरूपं किं स्तौमि किं वर्णयामि वचनविषयत्वाभावादिति भाव ॥ ११ ॥

नमस्कारमाह ।

श्वेतं श्याममिति प्रकाशयति चेदर्क' स किं श्यामता
श्वेतत्वं च दधाति तद्वदितरो मुग्धेषु बुद्धेषु यः ।
द्वैताद्वैतविकल्पजालकलनातीताय शुद्धात्मने
जाग्रत्स्वानुभवप्रकाशमहसे देवाय तस्मै नमः ॥१२॥

श्वेतमिति । स आकाशस्थोऽर्क. सूर्यः सामान्यरूपेण प्रकाश्यप्राणिनेत्रस्थविशिष्टरूपेणच श्वेत शुक्ल सुधारूप्यादिद्रव्य-मिद शुक्लमित्येव प्रकाशयति व्यक्तीकरोति चेद्यदि तथा श्याम नील कज्जलादिद्रव्यं श्याममित्येव प्रकाशयति व्यक्तीकरोति चेद्यदि तर्हि स आकाशस्थश्चक्षुष्ठो वा सूर्यः श्यामता नी-लत्व श्वेतत्वं च शुक्लत्वमपि दधाति धरति किं नैव दधातीत्यर्थः, चक्षुष्ठः सूर्योपि परमार्थतः श्वेतत्व श्यामत्व वा न दधाति च-क्षुष्ठसूर्यस्यापि आकाशस्थसूर्यमात्रत्वात् किं पुनराकाशस्थसूर्यो न दधातीति वक्तव्यमिति भावः, तद्वत्तथा मुग्धेषु अज्ञानिषु बुद्धेषु ज्ञानिषु इतरो भिन्नो ज्ञानाज्ञानयोः सामान्यप्रकाशरू-पोपीदं ज्ञानमिदमज्ञानमिति विशेषप्रकाशकतया स्थितोपि य आत्मास्ति स सामान्यप्रकाशकरूपो विशेषप्रकाशकरूपो वा ज्ञानाज्ञानाभ्या तद्वद्भ्या च भिन्नोऽस्ति ज्ञान्यज्ञानित्वे ।चदाभा-

सेऽपि परमार्थेनो न स्तः किं पुनर्वक्तव्यं न चिदात्मनीति भावः, य एव भूतस्तस्मै द्वैतविकल्पजालकलनातीताय द्वैतं कल्पितं जगदद्वैतं तन्निषेधकं कल्पितं शबलं ब्रह्म तयोर्विकल्पः सच्चिदानन्दलक्षणलक्षितात्मविपरीतत्वेन कल्पना तदेव जालमावरकत्वात्तस्य कलना कल्पना तस्या अतीताय मुक्ताय्यात एव शुद्धात्मने मायातत्कार्यास्पृष्टरूपाय जाग्रत्स्वानुभवप्रकाशमहसे जाग्रदुत्प्रकाशमानः स्वाऽसाधारणोऽनुभवो यत्र तत्तथोक्तं तथाभूतं प्रकाशरूपं महस्तेजो यस्य तस्मै देवाय चिन्मात्रस्वरूपायात्मशिवाय नमो नमस्कारोऽस्तु स्वात्मनश्चिदाभासस्य पृथक्त्वाभाव एव नमस्कारः कल्पनीय इति भावः ॥१२॥

क्षमापनमाह ।

सम्प्राप्यापि पदारविन्दपदवीमद्वैतविद्यावता-
मेतावन्तमनेहसं न तु वयं लीनाः सदा ब्रह्मणि ।
मुक्तानामपि मोहतः समरसत्वज्ञात्वपूर्णात्मना-
मस्माकं ह्यपराध एव परमं क्षन्तव्य एव प्रभो ॥१३॥

संप्राप्येति । अद्वैतविद्यावतामद्वैतं भेदरहितमात्मवस्तु तस्य विद्या ज्ञानं सा येषां विद्यते ते तथोक्तास्तेषां ज्ञानिनामित्यर्थः, पदारविन्दपदवीं पदं पादः स एवारविन्दं कमलं तस्य पदवी पद्धतिर्मोक्षस्य मार्गभूता तां सम्प्राप्यापि उपलभ्यापि वयमेतावन्तमद्यपर्यन्तमनेहसं कालं ब्रह्मणि अखण्डैकरसे सच्चिदानन्दे सर्वदैव निरन्तरं न तु नैव लीनास्तदाकारा न जाता इत्यर्थः, ननु तर्हि द्वैतादर्शनाभावे मुक्तसुखानुभवो न स्यात्तत्राह मुक्तानामिति, मोहतोऽज्ञानान्मुक्तानामपि मोक्षं प्राप्तानामपि ज्ञानमात्रेणाज्ञाननिवृत्तेर्मोक्षसिद्धिस्तु जातैवेति भावः,

ननु तर्हि द्वैतरूपदुःखानिवृत्तौ वैषयिकसुखेच्छया परमसुखानुभवो न स्यादित्याशङ्क्याह समरसेति, समरसत्वज्ञानपूर्णात्मना समः सदैकरूपो रसः सुखं यत्र तादृशो यस्त्वज्ञानस्त्वत्स्वरूपत्व तेन पूर्णात्मना निरतृप्तमन्तःकरणं येषां तादृशानामस्माकं ज्ञानेन बाधिते द्वैते प्रतीयमानेऽपि अबाधिताद्वैतसुखानुभवो भवत्येवेति भावः, अस्माकं त्वत्पूजकानां साधिष्ठानबुद्धिस्थचिदाभासरूपाणामित्यर्थः, हि प्रसिद्ध एषोऽयमेव परमोऽतिश्रेष्ठोऽपराधोऽन्यायो हे प्रभो हे समर्थ हे शिव त्वया क्षन्तव्य एव क्षम्यतामेव प्रारब्धक्षयपर्यन्तं विद्यमानस्य द्वैतजातस्य तत्क्षये क्षयसम्भवात्तत्क्षयपर्यन्तं सहनमेवोचितमिति भावः ॥१३॥

पुष्पाञ्जलिमाह ।

आत्मैवायमनन्तचिद्घनरसो नित्यं विमुक्तः स्वयं
को बन्धः किमु बन्धनं कथमसौ बद्धो विमुक्तः कथम् ।
सानन्दाश्रु सगद्गदं सपुलकं चिद्बोधपूजाविधौ
देवस्यास्तु मदीयविस्मयमयः संपूर्णपुष्पाञ्जलिः ॥१४॥

इति श्रीनरहरि० बो० मु० देवपूजानिर्णय ॥ १७ ॥

आत्मैवायमिति । अयमधिष्ठानसहितो बुद्धिस्थश्चिदाभासः साक्षिणो मम प्रत्यक्ष आत्मनः परमार्थतोऽभिन्नत्वादात्मैव स च्चिदानन्दलक्षणः प्रत्यगभिन्नः परमात्मैवानन्तचिद्घनरसो यतोऽनन्ता देशकालवस्तुकृतपरिच्छेदरहिता याचेतना तया घनो निबिडो यो रसः सुखं तद्यास्मिन्विद्यते स तथोक्तोऽर्श आद्यच्, अथवा घनो निबिडो रसः सुखरूपोऽत एव स्वयं स्वतो नित्यं सर्वदा विमुक्तो बन्धनरहितोऽस्ति अतोऽस्य को बन्धः कीदृशोऽवरोधोऽनन्तत्वादेव बन्धासिद्धेर्न कोऽपि बन्ध इत्यर्थः, ब-

न्धकारणाभावादपि बन्धाभावमाह किम्विति, बन्धन बध्यतेने-
नेति बन्धन बन्धसाधन रज्ज्वादीव गुणास्तत्कार्य वा किमु
किमस्ति न किमपीत्यर्थः, धर्म्यत्यन्तासत्त्वेन धर्मासत्वादिति
भावः, अतोमावात्मा कथ केन प्रकारेण बद्धो न केनापि प्र-
कारेण बद्ध इत्यर्थः, अतोसावात्मा विमुक्तो बन्धरहितः कथ
केन प्रकारेण न मुक्तोपीत्यर्थः, बन्धसापेक्षत्वान्मुक्तेर्मोक्षोप्या-
त्मनि नैव वास्तव इति भावः, एव मदीयविस्मयमयो मम सा-
धिष्ठानबुद्धिस्थाचदाभासरूपस्य पूजकस्य विस्मय आश्चर्यानु-
भवस्तन्मयस्तेन प्रचुरोऽन्तःकरणवृत्तिसमूह एव चिद्बोधपूजा-
विधौ चिच्चिन्मात्र आत्मैव तस्य बोधो ज्ञानमेव पूजाविधिः
पूजाप्रकारस्तस्मिन् सानन्दाश्रु आनन्दस्यात्मसुखानुभवस्याश्रु
जल तेन सह यथा भवति तथा, तथा सगद्गद गद्गदः कण्ठाव-
रोधेनाक्षरशैथिल्य तेन सहित यथा भवति तथा, तथा सपुलक
पुलको रोमाञ्चस्तेन सहित यथा भवति तथाऽस्य देवस्य स-
दैव प्रत्यक्षस्यात्मशिवस्य सम्पूर्णपुष्पाञ्जलि सम्पूर्णाय पूजा-
पूर्णतायै पुष्पाञ्जलिः साङ्ख्ययोगाख्यहस्तयोरेकार्थानुकूल्य-
रूप उक्तवृत्तिपुष्पाणामञ्जलिरिवाञ्जलिरस्तु भवतु ॥ १४ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ मु-
नीन्द्रदिनचर्यार्थप्रकाशे देवपूजानिर्णयार्थप्रकाश सप्तदश ॥१७॥

अथ देवपूजोपयुक्तशास्त्रार्थनिर्णय ।

एव देवपूजा निरूप्येदानी देवपूजाज्ञानसिध्यै देवपूजो-
पयुक्तशास्त्रार्थ निर्णेतु देवपूजोपयुक्तशास्त्रार्थनिर्णयाख्य सप्त-
श्लोक प्रकरणमभिदधान आह अथेति ।

अथ देवपूजोपयुक्तशास्त्रार्थनिर्णयः ।

अथ देवपूजानिर्णयानन्तरं देवपूजोपयुक्तशास्त्रार्थनिर्णयो देवस्य चिन्मात्रस्वरूपस्यात्मनः पूजोक्तलक्षणार्चा तस्यामुपयुक्त उपयोगी यः शास्त्रार्थः सिद्धान्तस्तस्य निर्णयो विचारः क्रियत इति शेषः, तत्र तावदज्ञानपूजात्यागेन ज्ञानपूजैवाङ्गीकार्येत्याह ।

त्यक्त्वा मोहमयीं पूजां पूजां बोधमयीं कुरु ।
चन्दनैरर्चनीयोऽयं न तु पङ्केन शङ्करः ॥ १ ॥

त्यक्त्वेति । हे शिष्य त्वं मोहमयीमज्ञानप्रचुरां पूजां लोकप्रसिद्धां परिचर्यां त्यक्त्वा विसृज्य बोधमयीं बोधो ज्ञानं तत्साधनं चाऽद्रोहादिकं गीतोक्तं तन्मयीं तत्प्रधानां पूजामर्चां कुरु विधीयतां कुत इत्यत आह चन्दनैरिति, अयं प्रत्यक्षो ज्ञानिपूज्यः शङ्करः स्वयं सुखरूपः समस्तजगदानन्दकरश्चास्ति अतश्चन्दनैरानन्दानुभवरूपैर्वृत्तिविशेषैरर्चनीयः पूजनीयो भवतीति शेषः, न तु पङ्केनाज्ञानकार्यत्वाद्दुःखरूपत्वाच्च पङ्केन स्वस्वरूपलेपकारणभूतेन लोकप्रसिद्धचन्दनादिद्रव्यार्पणरूपपूजनेन न तु नैव पूज्योऽतोऽज्ञानपूजा त्यक्त्वा ज्ञानपूजैवाङ्गीकार्येति भावः, चन्दनैरित्यत्र चादधातोः करणे ल्युट् ॥ १ ॥

ज्ञानाभावे देवपरिचयाभावेन पूजैव न स्यादित्याह ।

परिचीय पुरा देवं देवपूजापरो भव ।
देवे परिचयो नास्ति चेद् पूजा कथं भवेत् ॥ २ ॥

परिचीयेति । हे शिष्य त्वं पुरा प्रथमं देवं चिन्मात्ररूपमात्मानं परिचीय ज्ञात्वा ततो देवपूजायां परो रतः सन्भव तिष्ठ, ननु देवपूजा देवपरिचयाभावे सति कुतो न स्यादित्याशङ्क्याह देव इति, देवे पूज्ये चिदात्मनि परिचयो ज्ञानं नास्ति न विद्यते चेत् पूजा-

ऽर्चा कथ कीदृशी स्याद्भवेत्तद्वद कथय, परिचयाभावे देवस्य पूजैव न स्यादिति भाव ॥ २ ॥

कुतः परिचयाभावे पूजा न स्यात्तत्राह ।

तावत्पूजा न मनुते यावत्परिचयो न हि ।
जाते परिचये देव पूजामपि न काङ्क्षति ॥ ३ ॥

तावदिति। देवश्चिन्मात्र आत्मा यावद्यत्कालपर्यन्तं परिचयो ज्ञान न हि न विद्यते तावत्तत्कालपर्यन्त कृतामपि पूजामर्चा न मनुते नैवाङ्गीकरोति तर्हि ज्ञात्वैव त देव पूजा कर्तव्या तत्राह जात इति, देवश्चिन्मात्र आत्मा परिचयेऽनुभवे जात उत्पन्ने सति पूजामपि अर्चामेव न काङ्क्षति नेच्छति स्वस्य सुखरूपत्वप्रतीतौ सत्यां तत्सुखप्रतीतिप्रतिपक्षत्वाद् दुःखरूपस्य पूज्यपूजकभावस्यानङ्गीकारादेव तत्माऽन्यपूजेच्छाभाव इति भाव. ॥ ३ ॥

ननु तर्हि ज्ञाने पूजाऽसम्भवादज्ञानपूजैव कर्त्तव्येत्याशङ्क्याह ।

पक्षद्वयेपि पश्यामि पूजां देवस्य दुर्घटाम् ।
पूज्यपूजकता न ज्ञे मूर्खस्त्वज्ञानसूतकी ॥ ४ ॥

पक्षद्वय इति। हे शिष्य अह पक्षद्वयेपि पक्षयोर्ज्ञानाज्ञानपक्षयोर्द्वय युग्म तस्मिन् देवस्य चिन्मात्रस्यात्मन' पूजामर्चां दुर्घटा दुःसपादा पश्यामि जानामि कुत उभयपक्षेपि पूजाया दुःसपादत्वं तत्राह पूज्यपूजकता पूजितु योग्य' पूज्य' पूजार्ह ईश्वरभावः पूजति अर्हति स पूजको जीवभाव. पूजाकर्त्ता तयोर्भावः सत्ता न नास्ति अतो ज्ञानवति पूजाऽभाव सिद्ध इति भावः। मूर्खस्तु अज्ञानी तु अज्ञानसूतक्यज्ञान ज्ञानविरोधिभावरूप तदेव सूतकमाशौच विद्यतेऽस्य स तथोक्तः सूतकिनः पूजानिषेधः क-

र्मकाण्डे प्रसिद्ध एव तुशब्देनाऽज्ञानिनो ज्ञानिनोऽतीव वैलक्षण्य सूचितमिति ज्ञेयम ॥ ४ ॥

ज्ञानिविहितदेवपूजाया धूपदीपादीनामप्यपेक्षा नास्तीत्याह ।

न जाने क्व पलायन्ते धूपदीपाक्षतादयः ।
अस्माक देवपूजाया देव एवावशिष्यते ॥ ५ ॥

नेति । अस्माक नो ज्ञानिनामित्यर्थः, देवपूजाया देवस्य चिदात्मशिवस्य पूजार्चा तस्या क्रियमाणायां सत्यामित्यर्थः, धूपदीपाक्षतादयः=कर्मज्ञानमयो यदिन्द्रियगण इत्यत्रोक्तलक्षणो धूपो लौकिकोपि, दीपश्च यस्मिन्नुज्वलिते न तिष्ठति तम इत्यत्रोक्तलक्षणो लोकप्रसिद्धोपि, अक्षताः क्षान्तिः क्षान्तिरलोलता सरलता इत्यत्रोक्तलक्षणा लोकप्रसिद्धा अपि, आदयो मुख्या येषा नैवेद्यादीनामुक्तलक्षणानां लोकप्रसिद्धानामपि ते तथोक्तास्ते क्व कुत्र पलायन्ते गच्छन्तीत्यह न जाने नेव जानामि तर्हि सर्ववृत्तीना शून्यत्वे शून्यपरिशेष. स्यान्नेत्याहास्माकमिति, सर्वोपचाराभावेपि अह ब्रह्मास्मीतिवृत्तेर्विषयभूतो देव एव केवल चिन्मात्र आत्माऽवशिष्यतेऽवशिष्टो भवति ॥ ५ ॥

अन्यत्र लोकप्रसिद्धपूजाया पूजाक्रमविस्मृतिस्तु विघ्नायैव भवति । अत्र तु सैव पूजाफलरूपत्याह ।

देवानुसधानधिया विस्मृते पूजनक्रमे ।
पूजायां जायते विघ्न पर्णपजाफल हि तत् ॥ ६ ॥

देवेति । देवानुसन्धानधिया देवश्चिन्मात्रस्वरूप आत्मा तस्यानुसन्धान तद्विषयकविजातीयप्रत्ययानन्तरितसजातीयप्रत्ययप्रवाहरूपं तद्रूपा धीर्बुद्धिस्तया पूजनक्रमे पूजनस्योक्तलक्षणस्योक्तलक्षणे क्रमे विस्मृते विस्मृतिविषये जाते सति पूजा

थामुक्तपूजाकल्पनायां विघ्नो विघातो जायते भवति हि प्रसिद्धमेव सर्वेषामेतत्,तादृग्ब्रह्मरूप लोकदृष्ट्या यत्तत्पूर्णपूजाफलं पूर्णब्रह्माकाररूपत्वात्पूर्णं पूजाया उक्तलक्षणायाः पूजायाः फल प्रयोजन ज्ञेय लौकिक्या अपि तज्ज्ञेय तस्मिंश्च सति नोभयविधपूजाया प्रयासः कार्य इति भावः ॥ ६ ॥

ननु भवदुक्तपूजाधिकारिणि विदुषि पूज्यपूजकता न हि इत्यनेनोभयभावो निषिद्ध , तथा त्यक्त्वा मोहमयी पूजामत्यत्र बोधमयपूजने प्रवर्तितव्य नाज्ञानपूजायामिति अत पूर्वापर विरोधाऽतोस्या पूजाया पूज्यपूजकत्वाभावे कथ पूजाया प्रवृत्तिर्ज्ञानिनः स्यादित्याशङ्क्य प्रारम्भे जिज्ञासायां सत्यामज्ञानाशेन पूज्यपूजकत्वसम्भवात्तत्र प्रवृत्ति' पूर्णे ज्ञानेऽज्ञानांशस्य निवारितत्वात्पूज्यपूजकत्वाभावो ज्ञानिनि सम्भवत्यतो न विरोध इत्याशयेनाह ।

आनन्दघनगोविन्दपूजनारम्भकर्मणि ।
बोधे स्फुरति मोहात्मा यजमानः पलायितः ॥ ७ ॥

इति श्रीनरहरिकृतौ बोधसारे मुनीन्द्रदिनचर्यायां देवपूजोपयुक्तशास्त्रार्थनिर्णय ॥ १८ ॥

आनन्देति । आनन्दघनगोविन्दपूजनारम्भकर्मणि आनन्दो निरतिशयसुख 'यो वै भूमा तत्सुख नाल्पे सुखमस्तीति श्रुतौ यद्भूमशब्दवाच्य सुख तेन घनो निबिडो निश्छिद्र इत्यर्थ', स तादृश एव गोविन्दो 'धियो यो नः प्रचोदयादि'ति गायत्र्यास्तृतीयपादे बुद्धिप्रेरकत्वेन निर्दिष्ट स्वसत्त्वदानेन गा बुद्धि विन्दति रक्षतीति धातूनामनेकार्थत्वाद्गोविन्दो बुद्धिसाक्षी ब्रह्माभिन्नः प्रत्यगात्मा तस्य पूजन पूजाऽऽरभ्यते प्रक्रियतेऽस्मिंस्तच्च तत्कर्म क्रिया तस्मिन् बोधे केवलात्मज्ञाने स्फुरति

प्रकाशमाने सति मोहात्मा मोहोऽज्ञानं तत्कार्यरूपो भ्रमश्चाऽऽत्मा स्वरूप यस्य स तथोक्तो यजमानः पूजको जीवभावः पलायितो गतो नष्ट इत्यर्थ , अखण्डैकरसात्माशवपूजारम्भे केवलबोधस्फुरणनाज्ञानरूपस्वकारणनाशेन तत्कार्यभूतपूजकलयसम्भवाल्लौकिकपूज्यपूजकलयोपि सम्भाव्य इति भाव' ॥ ७ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीपौ मुनीन्द्रादिनचर्यार्थप्रकाशे देवपूजोपयुक्तशास्त्रार्थनिर्णयाथ प्रकाशोऽष्टादश ॥ १८ ॥

अथ पञ्चमहायज्ञनिर्णय' ।

एवं ज्ञानिना देवपूजा सशास्त्रार्था निर्णीयेदानीं तेषामेव पञ्चमहायज्ञान्निर्णेतु पञ्चमहायज्ञनिर्णयाख्यमेकश्लोक प्रकरणमभिदधान आह ।

अथ पञ्च महायज्ञा ।

अथेति । अथ देवपूजोपयुक्तशास्त्रार्थनिर्णयानन्तरं पञ्च पञ्चसंख्या महायाज्ञा महान्तः श्रेष्ठा यज्ञाः क्रतवो निर्णीयन्त इति शेष , तानेवाह ।

ज्ञाननिष्ठा क्षमा सत्यं विवेकः परिपूर्णता ।
एते पञ्च महायज्ञा समता ब्रह्मवेदिनाम् ॥ १ ॥

इति नर० बोध० मुनीन्द्र० पञ्चमहायज्ञनिर्णय ॥ १९ ॥

ज्ञाननिष्ठेति । ज्ञाननिष्ठा ज्ञाने भामत्यागलक्षणया महावाक्यजन्याहब्रह्मास्मीतिसाक्षात्काररूप निष्ठा सहजप्रीतिरेक , क्षमा सुखदु खादिद्वन्द्वाना सहनता द्वितीयः, सत्य सत्यप्रतिज्ञा सत्यभाषणादि च तृतीयः, विवेको विविच्यते आत्मानात्मपदार्थावनेनेति विवेको विचारश्चतुर्थ', परिपूर्णता सर्वत्र स्वपरिपूर्णत्वनिश्चयः पञ्चमः, एत इमे पञ्च पञ्चसङ्ख्या महायज्ञा श्रेष्ठा

यज्ञा ब्रह्मवेदिना ब्रह्मज्ञानिना संमता इष्टा ज्ञातव्याः ॥ १ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ मुनीन्द्रदिनचर्यार्थप्रकाशे पञ्चमहायज्ञनिर्णयार्थप्रकाश एकोनविंशः ॥ १९ ॥

अथोपयज्ञनिर्णयः।

एवं ज्ञानिना पञ्चमहायज्ञान्निरूप्येदानीं तेषामुपयज्ञान्निर्णेतुमुपयज्ञानिर्णयाभिधं त्रिश्लोकं प्रकरणमभिदधान आह।

अथोपयज्ञनिर्णयः।

अथेति। अथ पञ्चमहायज्ञनिरूपणानन्तरमुपयज्ञा नैमित्तिका यज्ञाः क्रतवो निरूप्यन्त इति शेषः, तत्र तावज्ज्ञानिनामुपयज्ञकर्त्तव्यता विधत्ते।

एतस्यां दिनचर्यायां प्राप्ते पर्वणि पर्वणि।
मध्ये मध्ये चोपयज्ञाः कर्तव्या दीक्षितेन हि ॥१॥

एतस्यामिति। एतस्यामुक्तलक्षणायां विवेकिप्रत्यक्षायां दिनचर्यायां मुनीन्द्रदिनव्यवहृतौ पर्वणि पर्वणि उक्तलक्षणदिनव्यवहारतद्विरुद्धव्यवहारयोः सन्धौ सन्धौ प्राप्ते लब्धे सति मध्ये मध्ये तदन्तरेन्तरे चोपयज्ञा नैमित्तिका यज्ञा दीक्षितेन गुरूपदेशरूपदीक्षावता मुमुक्षुणा कर्त्तव्याः कार्या हि एते चोपयज्ञा ज्ञानिषु प्रत्यक्षाः ॥ १ ॥

तानेव विशिष्टान्दर्शयति।

यत्परोडशतां याति कालखण्डं मनःपशोः।
कर्त्तव्यास्तादृशा यज्ञा देवेन्द्रप्रीतिहेतवे ॥ २ ॥

यदिति। मनःपशोः सङ्कल्पविकल्परूपान्तःकरणपशोः,। वक्ष्यति हि

चित्ताहङ्कृतिबुद्धिमानसमयैर्युक्तं चतुर्भिः पदै-
श्छित्वान्तः करण पशु परशुना बोधेन तीक्ष्णेन यः ।

इत्यादि, कालखण्ड कालस्यापि मनसा कल्पितत्वान्मनः पशुसम्बन्धिकाल एव खण्ड शकलमश इत्यर्थ, यत्पुरोडाशता येषा ज्ञानियज्ञानां तेषामपि ज्ञानरूपत्वात्पुरोडाशता पुरोडाशो यजमानभक्षणीयो हुतशेषस्तस्य भावस्तत्ता ता याति प्राप्नोति; वक्ष्यति हि, कालेन भक्षित विश्व कालो बोधेन भक्षित इत्यादिना ताहशास्ताहग्लक्षणवन्तो यज्ञा क्रतवो देवेन्द्रप्रीतिहेतवे देवानामिन्द्रियनदधिष्ठातृतद्विषयरूपाणा चैतन्यानामिन्द्रोऽन्त करणावच्छिन्न. साधिष्ठानश्चिदाभासस्तस्य प्रीति सन्तोषो नित्यतृप्तिरित्यर्थ , तस्या हेतवे तदर्थ कर्त्तव्या. कार्या मुमुक्षुभिरात शेष ॥ २ ॥

ताहशा इत्युक्त्या तेषा लक्षणज्ञानमपेक्षितमिति तल्लक्षणाज्ञानाय ज्ञानिविहितसुपर्णचयनलक्षण तत्फल चान्ययज्ञलक्षणानि ज्ञातुमाह

एकीकृत्य सुपर्णौ द्वौ चीयते चेत्सुपर्णचित् ।
जीयते तन्मुनीन्द्रेण शतस्याग्निचिता फलम् ॥ ३ ॥

इति श्रीनरहरिकृतौ बो० मुनी० उपयज्ञनिर्णयो विंश ॥ २० ॥

एकीकृत्येति । द्वावुभौ सुपर्णौ व्यावहारिकदृष्ट्या द्वित्वेन प्रतीतौ सु शोभनौ पर्णौ पक्षौ ययोस्तौ सुपर्णौ जीवस्य धर्माधर्माविष्टानिष्टगतिसाधनत्वात्पक्षौ, ईश्वरस्य तु जगत्पालनादि प्रवृत्तिसाधन मायाख्य एकः, द्वितीयः स्वरूपस्थितिसाधनभूतो ज्ञानरूप इति विवेकः, सुपर्णत्व च हसत्वमनयो' श्रुत्योपासनार्थमुक्त तथा च श्रुतिः 'द्वा सुपर्णा सयुजा सखाया सम न वृक्ष परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीती'ति, एतावेकीकृत्योभयोर्विरुद्धाशत्यागेन चिन्मात्रत्वस्योभयोरविशिष्टत्वा-

देकस्य सपाशाग्नयोरेकत्वं च तदुत्तरश्रुत्यैवोक्तत्वात्पारमार्थिक-मिति निश्चेत्येर्थे, तथा च तदुत्तरमन्त्रः ।

'एक सुपर्णः स समुद्रमाविवेश । स इदं विश्वम्भुवनं वि चष्ट'इत्यादि ।

समुद्र इति वाचो नाम वाक्प्रतिपाद्यत्वाद्ब्रह्मात्र जगदित्यर्थः, चीयते एकीभावेनावलोक्यते मुनिना येद्यदि तर्हि सुपर्णचित् सुपर्णचयननामा यज्ञो जायत इति शेषः, तत्तर्हि मुनीन्द्रेण मननवस्तु श्रेष्ठिनोक्तलक्षणसुपर्णचयनकृता पुरुषेणाग्निचिता लोकप्रसिद्धानामग्निचयनानां शतकस्य फलं पुण्यं जीव्यते प्राप्यते ॥ १ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीपौ मुनीन्द्रदिनचर्यार्थप्रकाशे उभययज्ञनिर्णयार्थप्रकाशो विंशतितम ॥ २० ॥

अथ नित्यदाननिर्णय ।

एवमुभयज्ञान्निर्णीयेदानीं नित्यदानं निर्णेतुं नित्यदान-निर्णयाख्यमेकश्लोकं प्रकरणमारभमाण आह ।

अथनित्यदानम् ।

अथेति । अथोभययज्ञनिरूपणानन्तरं नित्यदानं मुनीनां नित्यदानं निर्णीयत इति शेष, तदेवाह ।

समाधितीर्थे मुनिना ग्रहणे चंद्रसूर्ययोः ।
दत्तमात्मसमं हेम पात्राय परमात्मने ॥ १ ॥

इति श्रीन० बो० मुनी० नित्यदाननिर्णय एकविंश ॥ २१ ॥

समाधितीर्थ इति । लोके तावन्नित्यदानं कांस्यपात्रसुवर्णघृतादिकं दीयते तत्प्रसिद्धमेव तदपि देशकालतीर्थभेदेन नि

मित्तभेदेन च पुण्यप्रद तारतम्येन भवति तीर्थभेदेन पुष्करादि-निमित्तेन देशभेदेन कुरुक्षेत्रादौ कालभेदेन संक्रान्तिग्रहणादौ निमित्तभेदेन पुत्रजन्मादौ दान च तुलादिक श्रोत्रियाय पात्राय दीयत इति प्रसिद्धम् । अत्र तु तत्सर्वमलौकिक, तद्यथा मुनिना मननवता ज्ञानिनेत्यर्थ., समाधितीर्थे सम्यगाधीयते चिन्त्यते ब्रह्म यस्मिन्स समाधिः, यद्वा सम ब्रह्माऽऽधीयते लक्ष्यतेस्मिन्निति समाधिः, यद्वा समा ब्रह्माकारा आधय मानसदु.खानि अस्मिन्निति समाधिः स एवतीर्थं सर्वमलनिवर्तकत्वात्तस्मिन् निमित्तमाह ग्रहण इति, चन्द्रसूर्ययोश्चन्द्रश्चन्दयति आल्हादयतीति चन्द्र आत्मसुखानुभवः, सूर्यः प्रकाशकत्वादात्मस्वरूपस्य सूर्यो विवेकस्तत्फलरूपोऽनात्मबाधस्तयोग्रहणेऽङ्गीकारे कृते सति, यद्वा चन्द्रोऽपानः सूर्य प्राणः, 'अपानश्चन्द्रमा प्रोक्तः प्राणः सूर्यः प्रकीर्तित' इत्युक्तेस्तयोर्ग्रहणा वशीकारस्तस्मिन्सतीत्यर्थः, पात्रमाह परमात्मन इति, परमात्मने पर कार्यकारणातीत आत्मेश्वरस्तस्मै पात्राय पात्रभूताय ब्रह्माभिन्न प्रत्यागात्मैवात्र पात्र ज्ञेय, देयमाह दत्तमिति, आत्मसममात्मन प्रत्यगात्मन समं सदृश चिदाभासरूप हेम सुवर्णवत्तेजोरूप प्रकाशबहुलमित्यर्थ, दत्त समर्पित तदभिन्नमनुभूतमित्यर्थ ॥ १ ॥

इति श्रीनरह० बोध० मुनीन्द्रदिन० नित्यदाननिर्णयार्थप्रकाश एकविंश ॥ २१ ॥

अथ मध्याह्नसन्ध्यानिर्णय ।

एव नित्यदानमुक्त्वा मध्याह्नसन्ध्या निर्णेतु मध्याह्नसन्ध्यानिर्णयाख्यमेकश्लोक प्रकरणमारभमाण आह ।

अथ मध्याह्नसन्ध्या ।

अथेति । अथ नित्यदाननिर्णयानन्तरं मध्याह्नसंध्याऽह्नो दिनस्य मध्य मध्याह्न तस्य सन्धिस्तत्र भवा मध्याह्नसन्ध्या मध्याह्नसन्ध्याख्या क्रिया निर्णीयत इति शेष, तामेवाह ।

दर्शनस्पर्शनघ्राणरसनश्रवणादिषु ।
यश्चैतन्यचमत्कारो मुनेर्माध्याह्निकं तु तत् ॥ १ ॥

दर्शनेति । दर्शनस्पर्शनघ्राणरसनश्रवणादिषु लौकिक माध्याह्निक प्रसिद्धमेव, इद त्वलौकिक ज्ञानभास्करोदयाद्युपलक्षितस्य ज्ञान्यह्नो मध्यता तीव्रप्रकाशोपलक्षित· कालस्तदा च दर्शन चक्षुर्द्वारानिर्गतान्त करणवृत्त्या नीलपीतादिरूपसाक्षात्कार·, स्पर्शन त्वग्द्वारा निर्गतान्त करणवृत्त्या शीतोष्णमृदुकाठिन्यादिस्पर्शसाक्षात्कार, घ्राण घ्राणद्वारा निर्गतान्त करणवृत्त्या सुगन्धदुर्गन्धादिविषयसाक्षात्कार, रसन रसनाद्वारानिर्गतान्त करणवृत्त्या मधुरकटुतीक्ष्णादिरससाक्षात्कारः, श्रवण श्रोत्रद्वारा निर्गतान्त करणवृत्त्या शब्दविषयसाक्षात्कार, एतानि आदीनि प्रथमतो येषा तेषु आदिपदेनात्र वचनादानादिकर्मेन्द्रियव्यापारा ग्राह्यास्तेषु विद्यमानेषु व्यवहारकाले सत्स्वपि यः सर्वत्रिपुटीबाधपूर्व य प्रसिद्धो योगिषु चैतन्यचमत्कारश्चैतन्यस्य चिदात्मनः सामान्यरूपेण चमत्कार स्फुरण भवति तत्तदेव मुनेर्मननवतो ज्ञानिन इत्यर्थः, माध्याह्निक मध्यस्थज्ञानभास्करोपलक्षितदिवसमध्यभव कर्म ज्ञेयमिति शेष ॥ १ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ मुनीन्द्रदिनचर्यार्थप्रकाश मध्याह्नसन्ध्यानिर्णयार्थप्रकाशो द्वाविंश ॥ २२ ॥

अथ वैश्वदेवनिर्णय ।

एवं मध्याह्नसन्ध्या निर्णीयेदानीं मुनीनां वैश्वदेवाख्यं कर्म निर्णेतुं वैश्वदेवनिर्णयाख्यमेकश्लोकं प्रकरणं वक्तुमाह ।

अथ वैश्वदेव ।

अथेति । अथ मध्याह्नसन्ध्यानिरूपणानन्तरं वैश्वदेवो वैश्वदेवाख्यं कर्म निर्णीयत इति शेष, तमेवाह ।

आत्मा विश्वस्य देवोऽयं विश्वेन हविषेज्यते ।
तत्कर्म वैश्वदेवाख्यं सर्वसूनानिवृत्तये ॥ १ ॥

इति श्रीन० बोधसारे मुनीन्द्रदिनचर्यायां वैश्वदेवनिर्णयस्त्रयोविंश ॥ २३ ॥

आत्मेति । अयं विवेकिषु अस्मदादिषु प्रत्यक्षत्वपरोक्षत्वरहितत्वेन स्वयं प्रकाशमानः प्रत्यक्ष आत्मा प्रत्यगभिन्नः परमात्मा विश्वस्य समस्तस्य जगतो देवश्चिन्मात्ररूपेण प्रकाशकः स विश्वेन समस्तजगता हविषा होमद्रव्येणेज्यते हूयते तत्समस्तजगद्धोमद्रव्येणात्मपूजनरूपं कर्म क्रिया वैश्वदेवाख्यं विश्वदेवाख्यं विश्वदेव आत्मा तस्येदं विश्वदेवसम्बन्धीत्यर्थः, तस्येदमिति तद्धितोऽण्, वैश्वदेव आख्या आह्वा यस्य तत्तथोक्तं ज्ञेयं, यद्वा विश्वदेवायात्मने हितमिति व्याख्येयं तस्मै हितमिति, तद्धितोऽण् । फलमाह सर्वेति, सर्वसूनानिवृत्तये 'सर्वं खल्विदं ब्रह्मेति' श्रुतिदृष्ट्या सर्वपदवाच्यस्य द्वैतस्य या सूना हिंसा तन्निवृत्तये तत्परिहाराय भवतीति प्रयोजनं दर्शितं, यद्वा सर्वदोषपरिहारायेति प्रसिद्ध एवार्थ ॥ १ ॥

इति श्रीनर० बोधसारे मुनीन्द्र० वैश्वदेवनिर्णयार्थप्रकाशस्त्रयोविंश ॥ २३ ॥

अथ बलिदाननिर्णय ।

एव वैश्वदेवं निर्णीयेदानीं तेषामेव बलिदाननिर्णेतुं बलिदाननिर्णयाख्यमेकश्लोक प्रकरणमभिदधान आह ।

अथ बलिदानम् ।

अथेति । अथ वैश्वदेवनिर्णयानन्तर बलिदान बलेर्भूतबलेर्दानं समर्पण निर्णीयत इति शेषः, तदत्र लौकिकबलिदानविलक्षण मुनीना बलिदान दर्शयति ।

नवद्वारां पुरीमेतामाश्रितेभ्यो दयालुना ।
भूतेभ्योपि बलिर्देय. खानपानादिलक्षणः ॥ १ ॥

इति श्रीनरहरिकृतौ बोधसारे मुनीन्द्रदिनचर्याया बलिदाननिर्णयश्चतुर्विंश ॥ २४ ॥

नवद्वारामिति । एता सर्वजनप्रत्यक्षा नवद्वारां नव नवसख्यानि द्वाराणि च्छिद्राणि यस्या सा तथोक्ता द्वे श्रोत्रच्छिद्रे द्वे नयनच्छिद्रे द्वे नासा च्छिद्रे एक मुखच्छिद्रमित्युपरि सप्त, एक गुदच्छिद्रमेक शिश्नच्छिद्रमिति द्वे अध, एवं नव द्वाराणि ज्ञेयानि, पुरीं नगरीं 'नवद्वारे पुरे देही'ति गीतोक्तामाश्रितेभ्य आश्रितस्थितेभ्यो भूतेभ्योपि वियदादिभ्यो भूतेभ्योऽपिशब्दात्तत्कार्येभ्य इन्द्रियेभ्यो दयालुना दयावता पुरुषेण एतानि भूतानि किमेतैर्ममेति नोपेक्षा कर्त्तव्या तेषा तद्ग्रासदानाभावे तत्क्षोभेण वृत्तिस्थैर्य न स्यादिति भावः, खानपानादिलक्षणः खानमन्नादेर्भक्षण पानं च जलादेः प्राशन ते आदिनी येषामिन्द्रियभोगादीनां श्रवणाद्यनुकूलाना तान्येव लक्षणानि यस्य स तथोक्तो बलि पूजा देयो दातु योग्यः ॥ १ ॥

इति श्रीन० बोध० मुनींद्रदिनचर्यार्थ० बलिदाननिर्णयार्थप्रकाशश्चतुर्विंश ॥ २४ ॥

अथ भोजननिर्णय ।

एवं मुनीनां भूतबलिं निर्णीयेदानीं तेषामेव भोजनविधिनिर्णयाख्यमेकश्लोकं प्रकरणमभिदधान आह ।

अथ भोजनविधिः ।

अथेति । अथ बलिदाननिर्णयानन्तरं भोजनविधिर्मुनीनां भोजनस्य विधिर्विधानं निर्णीयत इति शेषः, तमेव निर्णीय दर्शयति ।

गुरुभिश्च सतीर्थ्यैश्च शिष्यैश्च सहितस्तथा ।
सुरसं चारु भोक्तव्यं ज्ञानपीयूषमुत्तमम् ॥ १ ॥

इति श्रीनरहरिकृतौ बोधसारे मुनीन्द्रादिनचर्यायां भोजन निर्णयः पञ्चविंशः ॥२५॥

गुरुभिरिति । लोके हि पितृभिः पितृव्यैश्च स्वपुत्रैर्भ्रातृभिश्च सह मिष्टान्नं भुज्यते तद्वदत्रापि गुरुभिः स्वस्य महावाक्योपदेष्टृभिः पितृस्थानीयैः सतीर्थ्यैश्च समानमेकं तीर्थं गुरुर्येषां ते तथोक्ता गुरुबन्धव इत्यर्थः, तैरपि पितृव्यस्थानीयैरित्यर्थः, चकारात्स्वसतीर्थ्याः स्वगुरुबन्धवोऽपि स्वभ्रातृस्थानीया ग्राह्याः, तथा तद्वच्छिष्यैश्च स्वशिष्यैः पुत्रस्थानीयैः सहितो युक्तः सन्मुनिना सुरसं सुष्ठु शोभनो रसः सुखं यत्र तत्तथोक्तं 'रसो वै सः'इति श्रुतेः, उत्तमं श्रेष्ठमुद्गतं निरस्तं तमोऽज्ञानलक्षणं यतस्तत्तथोक्तं ज्ञानपीयूषं ज्ञानं महावाक्यजन्यं जीवब्रह्मैक्यविषयकमपरोक्षं तदेव पीयूषममृतमिव मरणनिवर्तकत्वादहं ब्रह्मास्मीति साक्षात्काररूपमित्यर्थः, नित्यतृप्तिजनकत्वान्मोक्षसाधनत्वाच्चामृतत्वं ज्ञानस्येति भावः, चारु सप्रेम संशयविपर्ययादिरहितं यथा तथा भोक्तव्यमनुभाव्यमिदमेव विदुषां भोजनं नान्यदिति भावः ॥१॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थ० मुनीन्द्रदिनचर्यार्थप्रकाशे भोजनविधिनिर्णयार्थप्रकाशः पञ्चविंशः ॥ २५ ॥

अथ ताम्बूलग्रहणनिर्णयः ।

एवं मुनीन्द्राणां भोजनविधिं निर्णीयेदानीं तेषामेव ताम्बूलग्रहणं निर्णेतुं ताम्बूलग्रहणनिर्णयाख्यमेकश्लोकं प्रकरणमभिदधान आह ।

अथ ताम्बूलग्रहणनिर्णयः ।

अथेति। अथ भोजनविधिनिर्णयानन्तरं ताम्बूलग्रहणनिर्णयस्ताम्बूलस्य ग्रहणं सेवनं तस्य निर्णयो विचारः क्रियत इति शेषः, तदेव ज्ञानिनामलौकिकं ताम्बूलं दर्शयति ।

सत्यं प्रियं च पथ्यं च ब्रह्मचर्चात्मकं वचः ।
ताम्बूलग्रहणं कार्यं वदनं येन राजते ॥ १ ॥

सत्यमिति। सत्यं प्रामाणिकं केवले सत्यवचसि अप्रियता च सम्भवति अतस्तां निराकरोति प्रियं चेति, प्रियं च परोक्षतया प्रियं सत्याप्रियं वचसि परिणामे दुःखमपि क्वचिद्दृश्यतेऽतस्तदपि निराकरोति पथ्यं चेति, पथ्यं च दुःखपरिणामहीनमेतद्विशेषणविशिष्टवाक्यं स्पष्टं निर्दिशति ब्रह्मचर्चात्मकमिति, ब्रह्मचर्चात्मकं ब्रह्मणो देशकालवस्तुकृतपरिच्छेदहीनस्यात्मनश्चर्चा वाच्यार्थतया निरूपणं यत्र तदात्मा स्वरूपं यस्य तत्तथोक्तं वचो वचनं ब्रह्मणः सद्रूपत्वात्तन्निरूपकवचसः सत्यत्वं तथा ब्रह्मणः सुखरूपत्वात्तत्प्रतिपादकवचसः प्रियत्वं तथा ब्रह्मणः परिणामहीनत्वात्तत्प्रतिपादकवचसो दुःखपरिणामहीनत्वं तादृशं वचनमेव ताम्बूलग्रहणं ताम्बूलस्य ग्रहणं सेवनं कार्यं मुनिभिः कर्तव्यं, ननु ब्रह्मचर्चात्मकवचसः कुतस्ताम्बूलत्वमित्याशङ्क्य वदनशोभाकारित्वस्योभयत्र साम्यादित्याशयेनाह वदनमिति, येनोक्तलक्षणताम्बूलग्रहणेन वदनं मुखं राजते शोभते, 'यद्वा चेतो मुखः' इति श्रुतेर्ब्रह्मसुखानुभवकरणरूपान्तःकरणवृत्ति प्रमा-

ख्यैव भोजनसाधन मुखमिव ब्रह्मसुखामृतभोजनसाधनत्वाद्वदन राजते स्वय प्रकाशतया शोभत इत्यर्थ , अतोत्र विदुषामिदमेव ताम्बूलग्रहणमुचितमिति भावः ॥ १ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीपौ मुनीन्द्रदिनचर्यार्थप्रकाशे ताम्बूलग्रहणनिर्णयार्थ-प्रकाश षड्विंश ॥ २६ ॥

अथ वामकुक्षिशयननिर्णय ।

एव मुनीना ताम्बूलग्रहणं निर्णीयेदानीं प्रसङ्गप्राप्त तेषामेव विशिष्ट वामकुक्षिशयन निर्णेतु वामकुक्षिशयननिर्णयाख्य द्विश्लोक प्रकरणमारभमाण आह ।

अथ वामकुक्षिशयननिर्णय ।

अथेति । अथ ताम्बूलग्रहणनिर्णयानन्तर वामकुक्षिशयन-निर्णयः वामे सव्ये भाग कुक्षिस्तमध. कृत्वा यच्छयन निद्रा मुनिाविहिता विशिष्टा तन्निर्णयस्तस्य विचारः क्रियत इति शष , तत्र तावदादौ शयनार्थ निश्चिन्तताऽपेक्षिताऽतस्तन्निर्णय करोति ।

यावच्छरीरपतन प्राचीनै कर्मभिः कृतौ ।
योगक्षेमौ न चिन्त्यौ हि निर्योगक्षेम आत्मवान् ॥ १ ॥

यावदिति । हि यतः कारणाद्योगक्षेमौ योगोऽप्राप्तपदार्थानां प्राप्तिरूपः क्षेमश्च प्राप्तपदार्थपरिरक्षणरूपस्तौ द्वावपि यावच्छरीरपतनं यावत्काल शरीरपतन शरीरस्य देहस्य पतन पातो भवति तावत्तत्कालपर्यन्तं शरीरनाशावधीत्यर्थः, प्राचीनैः पूर्वजन्मभवैः कर्मभिरेतच्छरीरारम्भकैः प्रारब्धाख्यै. कर्मभिः कृतौ सम्पादिताविसेवं निश्चित्य तौ नानुसन्धातव्यौ किन्तु

आत्मवानाऽऽत्मा प्रत्यगात्मा ब्रह्माभिन्नश्चिन्त्यतया विद्यते यस्य स तथाविधो भूत्वा निर्योगक्षेमो योगक्षेमचिन्तारहितो भवेदिति शेषः, इयमेव निश्चिन्तता वक्ष्यमाणशयनोपयोगिनी नान्येति भाव ॥ १ ॥

एव शयनोपयोगिनी निश्चिन्तता निर्णीयेदानीं शयनोपयोगिसामग्रीनिर्णयपूर्वक शयन निर्णीय दर्शयति ।

समाधिशयने शुभ्रे सुखनिद्रां विधाय च ।
क्षण विश्रम्य तत्पश्चात्पुराणश्रवण चरेत् ॥ २ ॥

समाधीति । लोके तावच्छुभ्रे निर्मलवस्त्रैर्निर्मिते श्वेते समाधिशयने समाधिर्योगाकारान्तःकरणवृत्तिपरिणामः स यथा सुखसाधनभूतस्तद्वच्छयन शेतेऽस्मिन्निति शयन पर्यङ्कस्तस्मिन्, यद्वा समा आधय मानसव्यापारा यत्र भवन्ति तथाभूते शयने पर्यङ्के सुखनिद्रां सुखाय निद्रा सुषुप्तिस्तां विधाय कृत्वा च पुनस्ततः पश्चादनन्तर क्षण क्षणकाल विश्रम्य यावदालस्यक्षय तत्र पर्यङ्के विश्राम कृत्वेत्यर्थः, पश्चादनन्तर पुराणश्रवण पुराणाना भागवतादीनां श्रवण चरेत्कुर्यात, प्रकृते तु शुद्धे शुभ्रे निर्विकल्प इत्यर्थः, समाधिशयने समाधिरेव शयन पर्यङ्कस्तस्मिन् सुखनिद्रां भूमशब्दवाच्यसुखस्वरूपा निद्रा प्रपञ्चास्फूर्तिरूपां सुप्तिं विधाय कृत्वा च पुनस्ततत उत्थाने तत्र क्षण क्षणपरिमाणकाल विश्रम्य विश्राम कृत्वा पश्चादनन्तर पुराणश्रवण पुराणानां भारतादीनां श्रवण वक्ष्यमाणलक्षण श्रवणमित्युपलक्षण मननादीनां चरेत्कुर्यात् ॥ २ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ मुनीन्द्रदिनचर्यार्थप्रकाशे वामकुक्षिशयननिर्णयार्थप्रकाश सप्तविंश ॥ २७ ॥

अथ पुराणश्रवणनिर्णय ।

एवं वामकुक्षिशयन निर्णीयेदानी ततोत्र विहित पुराण-श्रवण निर्णेतु पुराणश्रवणनिर्णयाख्य सार्द्धद्विसप्ततिश्लोकं प्रकरणमारभमाण आह ।

अथ पुराणश्रवणनिर्णयः ।

अथेति। अथ वामकुक्षिशयननिर्णयानन्तर पुराणश्रवणनि-र्णय पुराणानां भारतादीनां श्रवणं वक्ष्यमाणलक्षण तस्य निर्णयो विचारः क्रियत इति शेष', मुनिभिः कथ पुराणादि श्रो-तव्य तन्निर्णीयत इत्यर्थ, तत्र तावत्प्रसिद्धान्यस्मिन्समये भारत-भागवतरामायणानि अतस्तेषामेव प्रथम निर्णयः क्रियते, तत्र च तावत्सर्वधर्मसग्रहत्वाद्भारतमेव प्रथम निर्णीयते चतुर्भिः श्लोकै, तदेव प्रतिजानीते ।

अथ भारतश्रवणनिर्णयः ।

अथेति । अथ पुराणश्रवणनिर्णयप्रतिज्ञानानन्तर भार-तश्रवणनिर्णयो भारतस्य भारताख्यशास्त्रस्य श्रवण तस्य निर्णयो विचारः क्रियत इति शेष., तत्र तावज्जिज्ञासूनां श्रोत-व्यतया विहितं भारतमभिनीय दर्शनयति ।

अष्टादशाध्यायमयी यत्र गीता निरूपिता ।
सर्वोपनिषदा तत्त्वं तन्महाभारत शृणु ॥ १ ॥

अष्टादशेति । यत्र यस्मिन्नर्थे जीवब्रह्मैक्यरूपेऽष्टादशाध्या-यमय्यष्टौ च दश चाष्टादशाष्टादशसख्या येऽष्टादशपर्वस्थानीया अध्यायास्तन्मयी तन्मुख्या गीता श्रीभगवताऽर्जुनाय शि-ष्याय गीता कथिताऽतो गीतानाम्नी वाक्यसहतिरूपा निरूपिता कथिता सा च सर्वोपनिषदामुप समीपे निषण्णं श्रेयो मोक्षरूपं यासु ता उपनिषदः सर्वा समस्ता या उपनिषद —

'ईशकेनकठप्रश्नमुण्डमाण्डूक्यतित्तिरिः ।
ऐतरेयं च छान्दोग्यं बृहदारण्यकं दशे'ति ॥

दशसंख्य'का उक्तास्तासां तत्त्वं तात्पर्यरूपमस्ति तदुक्त-लक्षणं महाभारतं भारतोऽर्जुनस्तदर्थं निरूपितत्वान्महतो मोक्ष-रूपार्थस्य प्रतिपादकत्वाच्च महाभारतं शृणु श्रोतव्यं त्व-येति शेषः ॥ १ ॥

ननु शतसहस्रसंख्ये भारते गीतैव श्रोतव्या चेद्भारतकर्त्रा व्यासेनेतिहासैः कुतो विस्तारः कृत इत्याशङ्क्याह ।

भारते व्यासमुनिना कथानां विस्तरः कृतः ।
कथामात्रमिदं विश्वमिति तेन प्रकाशितम् ॥ २ ॥

भारत इति । भारते भारतनाम्नि ग्रन्थे व्यासमुनिना व्या-सनाम्ना विवेकिना कथानां कथनीयार्थानां विस्तरो विस्ता-रेण वर्णनं कृत उक्तस्तेन कथाविस्तारेण कृतेनेदं सर्वेषां प्रत्यक्षं विश्वं जगत्कथामात्रं कथा कथनं वाक्तन्मात्रं 'वाचारम्भ-णं विकारो नामधेयं मृत्तिकेत्येव सत्यमि'ति श्रुतेरित्येवं प्रका-शितं सर्वेषामनुभवगोचरं कृतं सर्वस्य भारस्यानेकराजमुनीति-हासनिरूपकत्वादनेकेषां राजमुन्यादीनां तत्र तत्र वर्णनीयार्था-श्रितानामिदानीं दृग्विषयत्वाभावाच्च तेषां कथनमात्रत्वेन ज-गतोऽपि तल्लक्षणवत्त्वाद्वाङ्मात्रत्वं निश्चित्य मुमुक्षुभिस्तत्रादरं प-रित्यज्य गीताश्रवण एवादरः कर्त्तव्य इतीममर्थं बोधयितुं कथा-विस्तारः कृत इति भावः ॥ २ ॥

किञ्च भारतान्ते रचितेन शान्तिपर्वाख्यप्रकरणेनापीद-मेव सूचितमित्याह ।

समाप्ते भारते ग्रन्थे शान्तिपर्व निरूपितम् ।
तदुक्तं सर्वशास्त्राणां शान्तौ परिसमापनम् ॥ ३ ॥

समाप्त इति । भारते भारतनाम्नि ग्रन्थे समाप्ते ग्रथ्यते शास्त्रार्थोऽनेनेति ग्रन्थः शास्त्रं तस्मिन् समाप्त्युपसन्ने सति व्यासमुनिना शान्तिपर्वाख्य प्रकरण निरूपित तद्येन शान्तिपर्वरचनेन सर्वशास्त्राणा सर्वेषा समस्ताना शास्त्राणामुपदेशकग्रन्थाना शान्तौ वासनालयात्मनि मोक्षे परिसमापन तात्पर्यपर्यवसानमुक्तं कथित ।

'सर्वं कर्माखिल पार्थ ज्ञाने परिसमाप्यत'इति स्मृतेः, अतो भारतविस्तारश्रवणे आदर परित्यज्य शान्तसाधनज्ञानप्रतिपादकगीताश्रवण एवादरो विधेय इति भावः ॥ ३ ॥

ननु भारते तत्र तत्र वर्णधर्मा आश्रमधर्मा राजधर्मादयश्चोक्ता दृश्यन्ते तत्कथ तच्छ्रवण परित्यज्य गीतैव श्रोतव्येत्यभिधीयते तत्राह ।

नानाख्यानैर्महारम्या मोक्षधर्मा निरूपिताः ।
तदुक्त सर्वधर्माणा मोक्षधर्मा परा मता ॥ ४ ॥

इति श्रीन॰ बोध॰ मु॰ पु॰ भारतश्रवणनिर्णय प्रथम ॥ १ ॥

नानेति । मोक्षधर्मा मुक्तिसाधनभूता धर्मा निष्कामधर्मा भारते तत्र तत्र व्यासेन नानाख्यानैरनेकैरितिहासैर्महारम्या अतिरमणीया निरूपिताः कथितास्तत्तेन मोक्षधर्मविस्तारनिरूपणेन सर्वधर्माणा समस्ताना धर्माणा म ये मोक्षधर्मा मुक्तिसाधनभूता धर्माः परा श्रेष्ठा ममेत्यध्याहार्य मम धर्मनिरूपणकर्त्तुर्मता निश्चिता इत्येवमुक्त कथित व्यासेनेति ज्ञेयम्, अतो मोक्षधर्मप्रतिपादकत्वादपि गीतैव श्रोतव्या नान्यत्र भारतश्रवण आदरः कर्तव्य इति भावः ॥ ४ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीपिकायां मुनीन्द्रदिनचर्यार्थप्रकाशे पुराणश्रवणनिर्णयार्थप्रकाशान्तर्गता भारतश्रवणनिर्णयार्थप्रकाश प्रथम ॥ १ ॥

अथ भागवतश्रवणनिर्णय ।

एव भारतश्रवणनिर्णयमभिधायेदानी मुनीन्द्राणां भागवतश्रवण निर्णेतु भागवतश्रवणनिर्णयाख्य पञ्चश्लोक प्रकरणमारभमाण आह ।

अथ भागवतश्रवणनिर्णय ।

अथेति । अथ भारतश्रवणनिर्णयनिरूपणानन्तरं भागवतश्रवणनिर्णयो भागवतस्य ब्रह्मणो भगवता प्रोक्तस्य प्रतिपादकत्वाद्भागवताभिधस्य शास्त्रस्य 'तेन प्रोक्त'मित्यण्, यद्वा भगवत इद भागवत 'तस्येद'मित्यण् भगवत्स्वरूपनिरूपकत्वाद्भगवत्सम्बन्धिशास्त्रस्य श्रवण कर्तव्यतया विहित तस्य निर्णयो विचारः क्रियत इति शेष, तत्र तावद्दशमः श्रोतव्यतया प्रधानः श्रीभागवतमाहात्म्य उक्तस्तत्रापि रासपञ्चाध्याय्याः प्राधान्यमतस्तत्र गोपीभिः सह भगवतः क्रीडा निरूपिता तस्यास्तात्पर्यमाह ।

वृत्तिगोपीजनैः क्रीडन्ब्रह्मचर्य न मुञ्चति ।
यत्रान्तरात्मा गोपालस्तद्भागवतमुत्तमम् ॥ १ ॥

वृत्तिगोपीजनैरिति । यत्र भागवते भगवत्प्रतिपादिते ज्ञानशास्त्रे वृत्तिगोपीजनैर्वृत्तयोऽन्तःकरणवृत्तयस्ता एव गोपस्य सर्वेन्द्रियपालकस्याहङ्कारस्य स्त्रियस्तासा वृत्तिगोपीनां जनाः समूहास्तैः सह क्रीडन्नममाणः सन्नपि अन्तरात्मा सर्वभूतभौतिकप्रकाशत्वेन सर्वान्तर्यामिरूप आत्मा ब्रह्माभिन्नः प्रत्यगात्मा गोपालो गा बुद्धिवृत्तीः पालयतीति स्वसच्चित्सुखदानेन रक्षतीति गोपालः साधिष्ठानबुद्धिस्थचिदाभासो ब्रह्माभिन्नप्रत्यगात्माभिन्नश्चिदाभास इत्यर्थः, 'नान्योतोस्ति द्रष्टे'त्यादिश्रुतेः—

'क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारते'त्यादिस्मृतेश्च, अन्तरात्मैव गोपालो नान्य इति भावः, ब्रह्मचर्यं ब्रह्मणि तत्पदलक्ष्ये जगत्कारणेऽभिन्नत्वेन चरितुं स्थातुं शीलं न मुञ्चति न त्यजति व्यवहारसमये सर्वान्तःकरणवृत्तिसम्बद्धोपि परमार्थतस्तदस्पृष्टो ब्रह्माभिन्नः प्रत्यगात्मैव चिदाभासः समष्टिव्यष्टिरूपः सिद्धान्तित इति भावः, तदुक्तलक्षणार्थप्रधानमेव भागवतं भगवता ब्रह्मण उक्तं ज्ञानशास्त्रं उत्तममुद्गतं निवृत्तं तमो यस्मात्तत्तथोक्तं ज्ञेयमतस्तदेव श्रोतव्यतया विहितं ज्ञानिनामिति भावः, लौकिकार्थस्तावद् यत्र भगवद्गुणवर्णनप्रधाने शास्त्रेऽन्तरात्मा सर्वान्तर्यामी परमात्मैव गोपालो भूत्वा वृत्तिगोपीजनैः सर्वं गृहकृत्यं परित्यज्य रासक्रीडाया वृत्ताः प्रवृत्ता अतो वृत्तयश्च ता गोप्यो गोपस्त्रियस्तासां जनाः समूहास्तैः सह क्रीडन्रममाणः सन्नपि ब्रह्मचर्यं ब्रह्मचारिधर्मं जितेन्द्रियत्वमित्यर्थः, न मुञ्चति न त्यजति तदुक्तार्थप्रधानं भागवतं भगवद्गुणवर्णनप्रधानं शास्त्रमुत्तमं श्रेष्ठं ज्ञेयं नान्यद्देवीभागवतादिकमिति भावः ॥ १ ॥

एवं रासक्रीडातात्पर्यमुक्त्वा पूतनावधनिरूपणतात्पर्यमाह ।

बालानां भक्षिका भीमा पूतना दुष्टवासना ।
कृष्णेन रुधिरं पीत्वा प्रापिता सापि तत्पदम् ॥२॥

बालानामिति । तत्रादौ मुनिग्राह्योऽर्थो निरूप्यते बालानामज्ञाततत्त्वानामविवेकिनामित्यर्थः, भक्षिका भक्षणकर्त्री भीमा तेषामेव भयजनयित्री पूतना पूतं पवित्रं रागादिहीनमन्तःकरणं नाशयति रागादिभिर्मलिनीकरोतीति पूतना 'अन्येष्वपि दृश्यते' इति नशेर्डो डित्वाट्टिलोपः, एतादृशी दुष्टवासना दुष्टा विषयैर्मलिना वासना सूक्ष्मा विषयेच्छासंस्काररूपा वृत्तिरास्ते या सापि

उक्तमलैरनन्त मोक्षायोग्यापि कृष्णेन ब्रह्माभिन्नेन सुखस्वरूपेण चिदात्मना तदभिन्नत्वानुसन्धानवता चिदाभासेनेत्यर्थः, तदुक्त

'कृषिर्भूवाचक शब्दो णश्च निर्वृतिवाचकः।
तयोरैक्य पर ब्रह्म कृष्ण इत्यभिधीयते' ॥ इति।

रुधिर तस्या आवरण स्वस्मिन्यत्तत्पीत्वा प्राश्य स्वस्मिन्कालत्रयेप्यसत्त्वमावरणस्यानुसधायेत्यर्थ, तत्पद तद्ब्रह्माभिन्नमात्मरूप पद स्वरूप प्रापिता तत्स्वरूपत्वेन संपादिता प्रत्यगात्मनः पृगसत्त्वात्तस्याः सा त न्मात्रत्वेनावलोकिता, लौकिकार्थस्तु दुष्टवासना दुष्टा बालघातविषया वासनेच्छा यस्याः सा तथोक्ताऽत एव बालानामर्भकाणा भक्षिका भक्षणकर्त्री भीमा भयङ्करा पूतना पूतनानाम्नी राक्षसी तस्या रुधिरमसृक्पीत्वा प्राश्य कृष्णेन गोपालेन सापि एतादृशीदुष्टापि तत्पद तत्कृष्णाख्य पद स्वरूप प्रापिता स्वस्मिँल्लीना कृतेत्यर्थ ॥ २ ॥

कालियदमनस्यापि तात्पर्यमाह।

अबलाना स्वनाथानाममृतत्वाय विष्णुना।
ताडितः कालसर्पोऽपि सर्वमानन्दितं जगत् ॥ ३ ॥

अबलानामिति। अबलाना नास्ति सामर्थ्य कस्मिन्नपि कार्ये स्वतो येषा ते तथोक्तास्तेषामत एव स्वनाथानां स्वयमात्मैव नाथः स्वामी पालको येषां ते तथोक्तास्तेषां स्वसंवित्सुखदानेन पालितानां चिदाभासानामित्यर्थः, अमृतत्वायाऽमृतत्व मोक्षस्तदर्थममृतत्व प्रापयितुमित्यर्थः, विष्णुना सामान्यरूपेण व्यापकेन प्रत्यगात्मना कालसर्पोऽपि कलयति क्षोभयति जगदिति काल सर्पति गच्छति सर्वत्रेति कालसर्पो गुणक्षोभकत्वेन मृत्युरूपेण च सर्वत्र विद्यमानत्वात् स तादृशरूपोऽपि ताडितो दण्डितः स्वसा-

स्पृथगसत्त्वबुद्ध्या बाधित इत्यर्थः, यदा तदेत्यध्याहार्यं, तदा सर्वं समस्त जगद्विश्व देहाद्यहङ्कारान्तमातर बहिश्चेश्वरपर्यन्तमानन्दितमानन्दः सुख सञ्जातोऽस्य तदानन्दित सुखितमित्यर्थः, 'तदस्य सञ्जात तारकादिभ्य इतजि'तीतज्, आत्मज्ञानेनात्मनो मृत्यो पृथगसत्त्वे निश्चिते सति परमानन्दो जीवाना स्यादिति कालियदमनतात्पर्यं ज्ञेयमिति भावः, लौकिकार्थस्तु अबलाना निर्बलाना स्वय कृष्ण एव नाथ स्वामी येषां तेषा वत्सगोगोपालानाममृतत्वाय मरणनिवृत्तये विष्णुना श्रीकृष्णेन कालसर्पोऽपि कालः श्याम. सर्पो भुजङ्गोऽपि कालियनामा सर्प इत्यर्थः, ताडितो दण्डितो यदा तदा सर्वं यमुनाजलजीवि जगत्प्राणिजातमानन्दित सुखितम् ॥ ३ ॥

अघासुरवधतात्पर्यमाह ।

ब्राह्मणा इव ता गावस्तीरस्था वन्यवृत्तय·
मोहाजगरनिगीर्णा गोविन्देन समुद्धृता ॥ ४ ॥

ब्राह्मणा इति । यथा ब्राह्मणा ब्रह्मविदस्तीरस्थाः प्रपञ्चनदीपारतट निर्विकारस्वरूप तत्र स्थितो वन्यवृत्तयो वन्य सम्भजनीय जीवब्रह्मैक्य तदाकारा वृत्तयोऽहब्रह्मास्मीत्येव रूपा येषां ते तथोक्तास्ते कदाचिन्मोहाजगरनिगीर्णा मोहो जीवब्रह्मैक्याज्ञान मूलाज्ञानं तेन निगीर्णा गिलिता यदा भवन्ति तदा गोविन्देन स्वासङ्गसच्चिदानन्ददात्रा प्रत्यगात्मना समुद्धृता मोहाजगरोदरात्पुनर्निष्कास्य जीवब्रह्मैक्यनिश्चये स्थापिता भवन्ति तद्वत्ता ब्रह्मवित्सम्बन्धिन्यो गावो वृत्तयो वन्य सेव्य ब्रह्मसुख तत्र वृत्तिः प्रवृत्तिर्यासां ता मोहाजगरनिगीर्णा मोहोऽज्ञान स एव सर्वजगद्ग्रसनशीलत्वादजगरो महासर्पस्तेन निगीर्णा आवृता यदि भवन्ति तर्हि गोविन्देन बुद्धे

स्वामङ्गसच्चित्सुखत्वदात्रा प्रत्यगात्मना समुद्धृता मोहसर्पोद-रान्निष्काश्य स्वस्मिन्स्थिरीकृताः भवन्तीत्यघासुरवधतात्पर्यं ज्ञेय, लौकिकार्थस्तु यथा ब्राह्मणा ब्रह्मजिज्ञासवस्तपस्विन-स्तीरस्था गङ्गादितटस्था वन्यवृत्तयो वने भव वन्य कन्दमू-लादिकं वृत्तिर्जीविका येषा ते तथोक्ता मोहाजगरनिर्गीर्णा मोहोज्ञान तदेवाजगरो महासर्पस्तेन निर्गीर्णा गिलिता ते गो-विन्देन तेषां बुद्धिमाक्षणा प्रत्यगात्मना समुद्धृता मोहान्नि-ष्कास्य स्वानुसन्धाने स्थापिता भवन्ति तथा ता व्रजस्था गावो धनवस्तीरस्था तीर यमुनातट तत्र स्था वन्यवृतयो वने भव वन्य तृणपर्णादिक वृत्तिर्जीविका यासा तास्तथोक्ता मोहव-द्बहुग्रासेनाजगरसर्पेणाघासुरेण निर्गीर्णा गिलितास्ते गोविन्देन गोपालेन समुद्धृतास्तदुदरान्निष्काश्य जीवायितेत्यर्थ ॥ ४ ॥

कसवधतात्पर्यमाह ।

स मूर्त्तिमानहङ्कार कसो नाम महाबल ।
स्वयमुत्पत्य कृष्णेन धृत्वासौ विनिपातितः ॥५॥

स इति । य प्रसिद्धो भागवते कसो नाम कसनाम्ना वर्णितो महाबलो महज्ज्ञान विनान्यसाधनैरनिवार्य बल सामर्थ्य यस्य स तथोक्त स क सुख स्यति खण्डयतीति व्युत्पत्या मूर्ति-मानाकारवानहङ्कार एव ज्ञेयोऽसावहङ्कारः स्वयमा-त्मनैव कृष्णेन ब्रह्माभिन्नेन परमानन्दरूपेणोत्पत्याहङ्कारादुड्डी-याखण्डसच्चिदानन्दरूपो भूत्वा धृत्वा स्वात्मनि कल्पितनिश्च-येन सन्धार्य विनिपातितो मारितो बाधित इत्यर्थः। लौकिका-र्थस्तु यो भागवते प्रसिद्धः कसो नाम कसनाम्ना प्रसिद्धो म-हाबलो महत्महस्रगजाना बल सामर्थ्य यस्य स तथोक्तः स कसो मूर्तिमान्साकारोऽहङ्कार एव ज्ञेयः, स कृष्णेन वासुदे-

वेन राय स्वत एवोत्पन्योड्डीयाऽसौ कसौ धृत्वा केशेषु सगृह्य विनिपातितो मारित एवमन्यलीलानामपि तात्पर्यमुन्नेयम् ॥ ५ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीपौ मुनीन्द्रदिनचर्यार्थप्रकाशे पुराणश्रवणनिर्णयार्थप्रकाशान्तर्गतो भागवतश्रवणनिर्णयार्थप्रकाशो द्वितीय ॥ २ ॥

अथ रामायणश्रवणनिर्णय ।

एव भागवतश्रवण निर्णीयेदानीं रामायणश्रवण निर्णेतु रामायणश्रवणनिर्णयाख्य पञ्चश्लोक प्रकरणमभिदधान आह ।

अथ रामायणश्रवणनिर्णयः ।

अथेति । अथ भागवतश्रवणनिर्णयानन्तर रामायणश्रवण निर्णयो रामायणस्य रामचरितस्य श्रवण तस्य निर्णयो विचारः क्रियत इति शेषः, आत्मनोन्यस्य सर्वस्य जडत्वे चिदाभासानामपि तथात्वावैशिष्ट्या 'यदेतज्जड मोहात्मक मायामात्रमि'ति श्रुतेश्चिदाभासानामपि जडत्वेन देहादिजगत प्रकाशकत्वासम्भवादात्मनस्त्वसङ्गत्वेन देहादिप्रकाशकत्वायोगाच्च कथ प्रकाशक विना प्रकाश्यनिर्वाह इति शङ्कापनोदायाहिल्योद्धारलीला कृतेति द्योतनाय तत्रादौ अहिल्योद्धरणतात्पर्यमाह ।

आभासरेणुभिस्तद्वज्जड देहादि चेतति ।
अहिल्यापि शिला यद्वद्रामस्य पदपांसुभिः ॥ १ ॥

आभासेति । यद्वद्यथा रामस्य दाशरथेः पदपांसुभि पदयोरङ्घ्र्योः पांसुभिर्धूलीकणै शिलापि गौतमशापेन शिलीभूतापि अहिल्याऽहिल्यानाम्नी गौतमस्त्री चेतिता चेतनीकृता तद्वत्तथा रामस्येति पुनर्योज्य रामस्य रमन्ते योगिनोस्मिन्निति रामोऽधिकरणे घञ् योगिना हृदि वा रमतेऽसौ रामः सुख-

स्वरूप आत्मेत्यर्थः, तस्याभासरेणुभिरा—ईषद्भासन्ते प्रकाशन्त इत्याभासाश्चिदाभासा इत्यर्थः, ते एव रेणव इव वायुरूपोपाधिनाकाशप्रसरणोपलक्षिता इव हृदयाकाशप्रसरणशीलत्वाद्धूलीकणास्तैरात्मनोऽन्यस्य सर्वस्य जडत्वनिर्णयाद्देहादि सर्वं जडं स्वतोऽप्रकाशरूपं जडैरप्याभासैश्चेतति स्वस्वविषयं प्रकाशयति एवं सभाग्यमिति भावः ॥ १ ॥

एवमहल्योद्धरणतात्पर्यमुक्त्वा हनूमत्कृतसमुद्रोल्लङ्घनतात्पर्यमाह ।

वानरो यत्प्रसादेन सतीर्णः क्षारसागरम् ।
नरः किं तत्प्रसादेन न तरेद्भवसागरम् ॥ २ ॥

वानर इति यत्प्रसादेन यस्य रामस्य प्रसादो दया तेन कृत्वा वानरो वा विकल्पेन नरोऽर्धमृगार्धनराकार इत्यर्थः, स हनूमान्क्षारसागरं क्षारजलपूर्णं सगरपुत्रैश्च सवर्धितं समुद्रं संतीर्णः सम्यक्तीर्त्वा परतीरं गतस्तेनेदं सूचितं नरो न राति आदत्ते सत्यत्वबुद्ध्या विषयानिति नरो वैराग्यादिसाधनसम्पन्नश्चिदाभासो वेदान्तश्रवणाद्यधिकारी जीव इत्यर्थः, स तत्प्रसादेन तस्य रामस्यात्मन इत्यर्थः, प्रसादः 'सर्वं खल्विदं ब्रह्मे'ति श्रुतिदृष्ट्या सर्वशब्दवाच्यद्वैतबाधेन सर्वस्य ब्रह्मत्वे सिद्धे रामेऽपि प्रत्यगात्मनि तद्ब्रह्मत्वं पूर्वमेव सिद्धमिति निश्चय एव प्रसादस्तेन कृत्वा भवसागरं संसारसमुद्रं न तरेत्किं किन्तु तरेदेवेत्येवं सम्भावनाजननाय हनूमत्कृतसमुद्रोल्लङ्घनं निरूपितमिति भावः ॥ २ ॥

एवं हनूमत्कृतसमुद्रोल्लङ्घनतात्पर्यमुक्त्वा सेतुनैव समुद्रतरणतात्पर्यमाह ।

प्राह रामस्तरन्सिन्धु शिलारूपेण सेतुना ।
संसारसिन्धुतरणं निर्विकल्पसमाधिना ॥ ३ ॥

प्राहेति । रामो दाशरथिः शिलारूपेण शिला पाषाणा एव रूपमाकारो यस्य स तथोक्तस्तेन सेतुना वारिबन्धेन सिन्धुं समुद्रं तरन्नुल्लङ्घमानः सन्प्राहोक्तवान् । किमुक्तवांस्तदाह संसारेति, संसारसिन्धुतरणं संसारो भव स एव सिन्धुः समुद्रस्तस्य तरणमुत्तारो निर्विकल्पसमाधिना निर्गता निवृत्ता विपरीता विविधाश्च कल्पाः कल्पना यत्र स तथाभूतः समाधिरसम्प्रज्ञातनामा तेन भवेत्स्यादिति ज्ञेयम् ॥ ३ ॥

सीतानयनरावणवधरामायणानां तात्पर्यमाह ।

शान्तिसीता समानीता निहतो मोहरावणः ।
आत्मारामेण रामेण तद्रामायणमुत्तमम् ॥ ४ ॥

शान्ति सीतेति । शान्तिर्निर्वासना ब्रह्मसुखानुभूतिरूपान्तःकरणवृत्तिरेव सीता सीतयति तापत्रयनिवृत्तिं करोतीति, सीता तालव्यादिर्दन्त्यादिश्चायं शब्दः समानीताऽङ्गीकृता रामेणेति शेषः, तथा तेनैव मोहरावणो मोहो मूलाज्ञानं जीवब्रह्मैक्यास्फुरणरूपं स एव रावणो दशेन्द्रियवशमुखो निहतो मारित आत्मारामेणात्मन्येवासङ्गसच्चिदानन्दरूपे आरमत आक्रीडत इत्यात्मारामस्तेन रामेण 'आत्मक्रीड आत्मरति'रिति श्रुत्युक्तलक्षणो रामो रमन्ते योगिनो यस्मिन्निति रामो योगिनां च हृदि रमते स रामो ब्रह्मविद्ब्रह्मैव भवतीति श्रुतेर्ज्ञानिनो ब्रह्मरूपत्वप्रतिपादनाद्ब्रह्मणश्च सर्वयोगिनामारामत्वप्रसिद्धेश्च सर्वयोगिशुद्धहृदयारामत्वाज्ज्ञानिरामेण मोहरावणं विनाश्य शान्त्याख्यसीतानयनं यत्राभिहितं तत्तादृशार्थादेव रामायणं सर्व-

योग्यागामभूतस्य ब्रह्मात्मनोऽयन प्रापक मार्गभूतमित्यर्थः, उत्तमं श्रेष्ठ ज्ञेय नान्यल्लौकिकार्थवद्रामायण श्रेष्ठमित्यर्थ· ॥ ४ ॥

एव रामायणाभिप्रायमुक्त्वा तमेवार्थ सम्भावयितु राम-शब्दार्थ स्पष्टमाह ।

रमन्ते योगिनो यस्मिन्रमते योगिना त्हृदि ।
तारक ब्रह्म रामाख्य रमता हृदये मम ॥ ५ ॥

इतिश्रीन०बो०मु०पु० रामायणश्रवणनिर्णय ॥ ३ ॥

रमन्त इति । योगिनो जीवब्रह्मैक्यज्ञानवन्तो योगाभ्यासव-न्तश्च यस्मिन् ब्रह्मणि रमन्ते क्रीडन्ति तदेव योगिना जीवब्र-ह्मैक्यज्ञानिना हृदि चेतसि सर्वदा रमते क्रीडति समाधिमता च समाधिसमये रमते क्रीडति तत्तारक ब्रह्म तारक· प्रणवस्त तद्वाच्य देशकालवस्तुकृतपरिच्छेदशून्यमात्मवस्तु रामाख्य प्र-त्यगभिन्न ब्रह्मोक्तार्थवत्त्वेन राम इत्याख्या यस्य तत्तथोक्त ज्ञेय तन्मम मे ब्रह्मात्मन इत्यर्थ ,हृदयेऽन्तः करणे रमता क्रीडतु इति प्रार्थना ॥ ५ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचिताया बोधसारार्थ० मुनी-न्द्रादिनचर्याथप्रकाशे पुराणश्रवणनिर्णयार्थप्रका शान्तर्गतो रामायणश्रवणनिर्णयार्थप्र-काशस्तृतीय ॥ ३ ॥

अथाष्टादशविद्यास्थाननिर्णय ।

एव रामायणतात्पर्यमभिधायेदानीमष्टादशविद्यास्थानता त्पर्य निर्णेतुमष्टादशविद्यास्थाननिर्णयाख्य सार्द्धसप्तषष्टिश्लोक प्रकरणमारभमाण आह ।

अथाष्टादशविद्यास्थाननिर्णय· ।

अथेति । अथ रामायणश्रवणनिर्णयानन्तरमष्टादशविद्या

स्थाननिर्णयोऽष्ट च दश चाष्टादश यानि विद्यास्थानानि ज्ञानाश्रयभूतानि शास्त्राणि तेषां निर्णयो विचारः क्रियत इति शेषः, तत्र तावत्प्रथमं निरूपयिष्यमाणाष्टादशविद्यास्थानज्ञापिका या ज्ञवल्क्यस्मृतिं निरूपयितुमाह ।

तदुक्तं याज्ञवल्क्यस्मृतौ ।

तदिति । तद्विद्यास्थानानामष्टादशत्वं याज्ञवल्क्यस्मृतौ याज्ञवल्क्यस्य स्मृत्याख्ये वाक्ये उक्तं कथितं, तामेव स्मृतिमुदाहरति ।

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥ १ ॥

पुराणेति । पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः पुराणानि भागवतादीनि, न्यायो न्यायशास्त्रं गौतमप्रणीतं, मीमांसा कर्मकाण्डार्थनिर्णायको जैमिन्यादिरचितो ग्रन्थकदम्बः, धर्मशास्त्रं मन्वादिभिः सङ्ग्रहितो धर्मनिर्णायकः स्मृतिवाक्यकदम्बः, अङ्गानि षट् शिक्षाकल्पव्याकरणनिरुक्तच्छन्दोज्योतिषाख्यानि, तत्र पुराणं पञ्चलक्षणमित्युक्तेः सर्गप्रतिसर्गवंशमन्वन्तरतद्वंश्यानुचरितनिरूपकाणि पञ्चलक्षणानि, न्यायः षोडशपदार्थविवेचको ग्रन्थः, एतैर्मिश्रिता युक्ता वेदाश्चत्वारोऽपौरुषेयवाक्यकदम्बरूपाः स्वतः प्रमाणभूता ऋग्यजुःसामाथर्वाख्याः, एवं चतुर्दश चत्वारश्च दश च चतुर्दशसङ्ख्यानि विद्यानां ज्ञानानां धर्मस्य च धर्मस्यापि स्थानानि आधारभूतानि मन्दिराणीत्यर्थः, ज्ञेयानीति शेषः ॥ १ ॥

आयुर्वेदो धनुर्वेदो गान्धर्वं चार्थशास्त्रकमिति ॥ २ ॥

तथाऽऽयुर्वेद आयुषो ज्ञानसाधनं चिकित्साशास्त्रं, धनु

वेदो धनुषोपलक्षितसर्वशस्त्रप्रयोगज्ञानसाधनं शास्त्रं, गान्धर्वं गानज्ञानसाधनं शास्त्रम् । अर्थशास्त्रं चाऽर्थानां द्रव्यादीनां प्राप्तिज्ञानसाधनं शास्त्रं नीत्याख्यमेव चत्वारि, पूर्वचतुर्दशभिः सहितान्येतानि चत्वारि मिलित्वाष्टादश भवन्तीति ज्ञेयानि ॥२॥

अथ पुराणनिर्णयः ।

एवमष्टादश विद्यास्थानान्यभिधायेदानीं तानि क्रमेण निर्णेतुं प्रथमं पुराणनिर्णयाख्यं द्विश्लोकं प्रकरणमभिदधान आह ।

तत्र प्रथमं पुराणनिर्णयः ।

तत्रेति । तत्र निरूपयिष्यमाणेषु अष्टादशविद्यास्थानेषु प्रथममादौ पुराणनिर्णयः पुराणानां भागवतादीनां निर्णयो विचारः क्रियत इति शेषः, तमेवाह ।

न घना प्रीतिरुत्पन्ना पुराणपुरुषे यदि

तदाष्टादशभेदेन पुराणश्रवणेन किम् ॥ १ ॥

नेति । यदि यर्हि पुराणपुरुषे जगदादिविकारहीनः सर्वे जगतः प्राक्कालीनः पुरुषः परिपूर्णो ब्रह्माभिन्नः प्रत्यगात्मा तस्मिन्नघना निबिडा प्रीतिः प्रेमा नोत्पन्ना न जाता चेत्तदा तर्हि अष्टादशभेदेन अष्टादशसङ्ख्याभेदभिन्नेन पुराणश्रवणेन पुराणानां भागवतादीनां श्रवणेन कृतेनापि किं फलं न किमपीत्यर्थः, पुराणश्रवणं तत्प्रतिपाद्याखण्डैकरसे ब्रह्माभिन्ने प्रत्यगात्मनि प्रेमोत्पादनार्थं तदभावे ईश्वरे वाऽतस्तदभावे पुराणश्रवणं कृतमपि निष्फलप्रयास एवेति भावः ॥ १ ॥

पुराणश्रवणशब्दार्थप्रतिपादनेनापि तमेवार्थं द्रढयति ।

पुराणोऽपि न जीर्णो यः स पुराणस्तु न श्रुतः ।

काय: पुराणतां प्राप्त पुराणश्रवणेन किम् ॥ २ ॥

इति० बो० मुनी० अष्टादश० पुराणनिर्णय प्रथम ॥ १ ॥

पुराणोपीति । यः पुराणेषु प्रतिपादित' पुराणोपि सर्वजगत्कारणत्वेन जगतः प्राक्कालीनापि न जीर्णो जरादिविकारैर्न विकृतः स तु पुराणो लौकिकपुराणविलक्षणो न श्रुतः पुराणश्रवणन वृत्तिगोचरीकृतः, किञ्च पुराणश्रवणं कुर्वतस्तव कायः शरीर पुराणता जीर्णता प्राप्तो यातस्तर्हि पुराणश्रवणेनाष्टादशभेदभिन्नपुराणाना श्रवणेन कृतेन किं फल सम्पादित न किमपि सम्पादितमित्यर्थ ॥ २ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचिताया बोधसारार्थदीपी मुनीन्द्रदिनचर्यार्थप्रकाशेऽष्टादशविद्यास्थाननिर्णयार्थ प्रकाशान्तगत पुराणनिर्णयार्थप्रकाश प्रथम ॥ १ ॥

अथ न्यायशास्त्रनिर्णय ।

एव पुराणनिर्णयमभिधायेदानी क्रमप्राप्तं न्यायशास्त्र निर्णेतु न्यायशास्त्रनिर्णयाख्य पञ्चश्लोक प्रकरणमभिदधान आह ।

अथ न्यायशास्त्रनिर्णयः ।

अथेति । अथ पुराणनिर्णयानन्तर न्यायशास्त्रनिर्णयो न्यायशास्त्रस्य मुनिविहितस्य निर्णयो विचार. क्रियत इति शेषस्तमेव वेदान्तानुकूल न्याय लक्षयति ।

यदात्मतत्त्वे विमले विश्रान्तिरचला भवेत ।

स एव न्याय इत्युक्त. शेष त्वन्यायलक्षणम् ॥१॥

यदिति। यत्रेन या विवेकिना प्रत्यक्षा विमले निर्मले मायाऽविद्यादिमलरहित इत्यर्थ, आत्मतत्त्व आत्मस्वरूपे त त्त्वेऽनारोपिते वस्तुनीत्यर्थ, अचला स्थिरा विश्रान्तिर्विश्राम-रूपा वृत्तिर्भवेत्स्यात् स एवात्मविश्रान्तिसाधनभूत एव न्याय इत्युक्तो न्यायनाम्ना कथितो विद्वद्भिरिति शेष, शेष तु तद्व्य-तिरिक्त न्यायशास्त्रमन्यायलक्षणमात्मविश्रान्तिविघातकत्वाद-न्यायस्यापराधस्य लक्षण चिन्ह ज्ञेयमतस्तन्मुमुक्षुभिर्नाङ्गीकार्य-मिति भाव ॥ १ ॥

ननु षोडशपदार्थविवेचकत्वेनात्मविश्रान्तिफलकत्वान्न्या-यशास्त्रस्य कथमन्यायत्वमित्याशङ्क्योक्तन्यायविदा तत्षोडशपदा-र्थचिन्तनमनिष्टमेव केवलात्मविश्रान्तिरेवेष्टेत्यन्यायत्व तस्येत्या-शयेनाह

आचिन्तन पदार्थाना न्याय न्यायविदो विदुः ।
अन्यायमार्गरसिकः स कथ न्यायशास्त्रवित् ॥२॥

अचिन्तनमिति । न्यायविद उक्तन्यायविदो वेदान्तानुकू-लन्यायवेत्तार इत्यर्थ, पदार्थाना नामरूपमात्राणा षोडशपदा-र्थानामचिन्तनमस्मरणमन्यानन्तरिनमात्मस्फुरणमित्यर्थः, न्याय नीति विदुर्जानीयु, ननु तर्हि षोडशपदार्थविवेचनप्रधानन्या यशास्त्राभ्यासिनामेव न्यायशास्त्रवेत्तृत्व कुत उच्यते लोक इत्या शङ्क्याह अन्यायेति, स षोडशपदार्थविवेचकन्यायशास्त्राभ्या स्यन्यायमार्गरसिकोऽनात्मपदार्थनिर्णायकत्वादात्मविश्रान्त्यभा वाच्चान्यायस्यापराधस्य मार्गः प्राप्तिसाधनभूत षोडशप दार्थविवेकस्तत्र रसिको रसज्ञोऽत कथ न्यायशास्त्रविन्न्या-योपदेशकग्रथज्ञ कथ केन प्रकारेण भवति नैव स न्यायशा-स्त्रवेदेत्यर्थ ॥ २ ॥

किञ्च तेषां विरुद्धभाषित्वादपि तेषां मतं मुमुक्षुभिर्नैव मन्तव्यमित्याह ।

स्वयं यत्तार्किकः प्राह तर्कोऽनिष्टप्रसञ्जनम् ।
तत्तार्किकस्य तर्केण कथमिष्टं प्रसज्यते ।

स्वयमिति। यद्यत कारणात्तार्किकस्तर्कं वेत्ति स तार्किको गौतमः स्वयं तर्कशास्त्रप्रणेतापि तर्कोऽनिष्टप्रसञ्जनम् 'अनिष्टप्रसञ्जनलक्षणस्तर्कः' इति तर्कलक्षणप्रतिपादकं सूत्रं प्राह कथितवान्तत्ततः कारणात्तार्किकस्येदानीतनतर्काभ्यासवतः कृतेन तर्केणानुमानेन श्रुतिविरुद्धतर्केणेत्यर्थः, इष्टं मुमुक्षूणां मोक्षाख्यं प्रियं सुखमित्यर्थः, कथं केन प्रकारेण प्रसज्यते प्रसक्तं भवति न कथमपीत्यर्थः, अतः श्रुतिविरुद्धं तर्कं परित्यज्य श्रुत्यर्थानुकूलतर्क एवादरो विधेय इति भावः ॥ ३ ॥

ननु श्रुतिविरुद्धतर्कस्यैव कुतस्त्याज्यत्वमित्याशङ्क्यात्मगोचरत्वेन निष्फलश्रमत्वादित्याशयेनाह ।

न तर्कितं परं ब्रह्म मेधया तीक्ष्णतर्कया ।
तदा कुतार्किकस्यास्य तर्ककर्कशता वृथा ॥ ४ ॥

नेति। तार्किकेण तीक्ष्णतर्कया तीक्ष्णोऽज्ञानभेदी तीक्ष्णस्तर्कोऽनुमानं यस्याः सा तथोक्ता तया मेधया धारणावत्या बुद्धिवृत्त्या परं ब्रह्म कार्यकारणातीतं देशकालवस्तुकृतपरिच्छेदशून्यमात्मवस्तु तर्कितं न तर्कगोचरं न कृतं यदा तदा तर्हि अस्य षोडशपदार्थविवेचकस्य लोकप्रसिद्धतार्किकस्य कुतार्किकस्य कुत्सितस्य तर्काभ्यासिनो वृथा व्यर्था निष्फलेत्यर्थः, तर्ककर्कशता तर्केऽनुमाने कर्कशता कठोरता ज्ञेया ॥ ४ ॥

ननु षोडशपदार्थविवेचकस्य तर्कस्य कुतो नैष्फल्यमित्या-

शङ्क्य षोडशपदार्थविवेचनेपि तर्कानवस्थादोषमस्त्वादित्याह ।

षोडशापि पदार्थास्ते त्वया तार्किक तर्किताः ।
तर्कोनवस्थितस्तर्हि तर्कातीते मनः कुरु ॥ ५ ॥

इतिश्रीनर० बा० मु० अष्टादश० न्यायशास्त्रनिर्णय ।

षोडशेति । हे तार्किक हे तर्कज्ञ त्वया तर्काभिनिवेशवता भवता ते तर्कशास्त्रे प्रतिपादिता, षोडश षोडशसङ्ख्या, पदार्थास्तत्त्वानि तर्किता अपि तर्कविषयीकृता यद्यपि तथापि तर्कोऽनुमानं नावस्थितोऽवस्थितिं न प्राप्तो यदि तर्हि तदा तादृश तर्कं परित्यज्य मनश्चित्तं तर्कातीते तर्कागोचरे आत्मनि विषये कुरु स्थापय मननवदन्तःकरणं तर्काभ्यासपरित्यागेनात्मविषयमननेनात्मनि लीनं कुरुष्वेति भावः ॥ ५ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ मुनीन्द्रदिनचर्यार्थप्रकाशेऽष्टादशविद्यास्थाननिर्णयप्रसङ्गितर्कशास्त्रार्थनिर्णयार्थप्रकाशो द्वितीय ॥ २ ॥

अथ वैशेषिकादिनिर्णय ।

एवं न्यायशास्त्रनिर्णयमभिधायेदानीं तत्प्रसङ्गाद्वैशेषिकसाङ्ख्यपातञ्जलानां निर्णयमभिदधान आह ।

अथ तर्कप्रसङ्गेन निर्णय क्रियतेधुना ।
वैशेषिकस्य सांख्यस्य तथा पातञ्जलस्य च ॥ १ ॥

अथेति । अथ न्यायशास्त्रनिर्णयानन्तरं तर्कप्रसङ्गेन तर्कस्य तर्कशास्त्रस्य प्रसङ्गेन प्रसङ्गादधुनेदानीं वैशेषिकस्य षट्पदार्थविवेचनप्रधानस्य शास्त्रस्य, तथा साङ्ख्यस्य सम्यक्ख्यायन्ते प्रकथ्यन्ते तत्त्वानि प्रकृत्यादीनि अस्मिन्निति साङ्ख्य

तस्य, यद्वा तत्त्वाना सङ्ख्या पञ्चविंशतिर्षड्विंशत्यष्टाविंशत्याद्या-स्तत्प्रतिपादकत्वात्सङ्ख्य सङ्ख्या अस्मिन्सन्तीति व्युत्पत्त्या म-तुबर्थेऽर्श आद्यच् ततः स्वार्थेऽण्, तथा पातञ्जलस्य च तद्रूप तञ्जलिप्रोक्तस्य योगशास्त्रस्य निर्णयो विचार क्रियते निरू-प्यते, एतेषा तर्कस्य चाङ्गाङ्गित्वात्तर्कप्रसङ्गादेतन्निर्णय. कथ्यत इति भावः ॥ १ ॥

तत्रादावष्टश्लोकं वैशेषिकनिर्णयाख्य प्रकरण वक्तुकाम आह ।

तत्र प्रथमं वैशेषिकनिर्णयः ।

तत्रेति । तत्र प्रतिज्ञातेषु मध्य आदौ प्रथम वैशेषिकनिर्णयो वैशेषिकस्य विशेषनिरूपणप्रधानस्य शास्त्रस्य निर्णयो विचारः क्रियत इति शेषः, तत्रादौ सविशेषपदार्थ निरूपण एव कुशलो वैशेषिको न निर्विशेषब्रह्मनिरूपण इत्याह ।

सविशेषाः पदार्था ये तत्र वैशेषिक कृती ।
निर्विशेष पर ब्रह्म तत्र वैशेषिकस्य किम् ॥ १ ॥

सविशेषा इति । ये ससार प्रसिद्धाः सविशेषा विशे षेण वैलक्षण्येन सह वर्त्तमानाः पदार्थाः पदानि नामानि अर्था स्तद्वाच्यानि रूपाणि तत्र तत्रैव तेषु पदार्थेषु वैशेषिको वैशेषिकशास्त्राभिनिवेशनात्कणादाद्यः पुरुषः कृती कृतकृत्यो भवेदिति शेष , नान्यत्र ब्रह्मणीत्यर्थः, कुतो ब्रह्मणा वैशेषि-काविषयत्व तत्राह निर्विशेषमिति, अस्माक मुक्त्यर्थिना त्विह पर कार्यकारणत्वधर्मरहित ब्रह्म देशकालवस्तुकृतपरिच्छेदर-हितमात्मवस्तु निर्विशेष निर्गतो निवृत्तो विशेषो भेदो यत-स्तत्तथोक्तमस्ति अतस्तत्र तस्मिन्ब्रह्मणि विषये वैशेषिकस्य वैशेषिकशास्त्रस्य तज्ज्ञस्य वा किं किङ्कार्य न किमपि कार्य

तत्र तस्येत्यर्थः ॥ १ ॥

ननु तत्त्वज्ञानं वैशेषिके निरूप्यते भवतोपीष्टं तत्त्वज्ञानमतो वैशेषिकस्य सप्रयोजनत्वमस्त्वित्याशङ्क्याह ।

मुक्तं साधर्म्यवैधर्म्यैस्तत्त्वज्ञानं हि मुक्तये ।
साधर्म्यवैधर्म्यकृतं तत्त्वज्ञानं न मुक्तये ॥ २ ॥

मुक्तमिति । साधर्म्यवैधर्म्यैः सह वर्त्तते धर्मैः तत्सधर्मं तस्य भावः साधर्म्यं विगतो धर्मो यस्मात्तद्विधर्मं तस्य भावो वैधर्म्यं धर्मरहितत्वं तैर्मुक्तं हीनं तत्त्वज्ञानं तत्त्वस्यानारोपितस्यात्मतत्त्वस्य ज्ञानं वेदनं हि प्रत्यक्षं तद्विवेकिनां मुक्तये मोक्षाय मुक्तिं प्राप्तुं साधनं भवति साधर्म्यवैधर्म्यकृतं साधर्म्येण वैधर्म्येण च कृतमुत्पादितं यत्तत्त्वज्ञानं साधर्म्यवैधर्म्यनिरूपितानां षट्पदार्थानां ज्ञानं वेदनं मुक्तये मोक्षाय न न भवति अतो वैशेषिकमते मुमुक्षुभिरादरो न कर्त्तव्य इति भावः ॥ २ ॥

वैशेषिकमते मुमुक्षुभिरनादरणीयत्वे हेत्वन्तरमाह ।

श्रुतिः सर्वपदार्थानां विस्मृत्या मुक्तिमाह यत् ।
तर्हि सर्वपदार्थानां चिन्तनैः किं प्रयोजनम् ॥ ३ ॥

श्रुतिरिति । यद्यतः कारणाच्छ्रुतिर्वेदवाक् सर्वपदार्थानां सर्वपदवाच्यानां द्वैतजातवस्तूनां नामरूपाणामित्यर्थः, विस्मृत्याऽननुसन्धानेन मुक्तिं मोक्षमाह वदति तर्हि तदा सर्वपदार्थानामस्माकं श्रुतिप्रामाण्यानां मुमुक्षूणां सर्वपदवाच्यद्वैतवस्तुजातानां वैशेषिकनिरूपितपदार्थानामित्यर्थः, चिन्तनैर्विचारैः किं प्रयोजनं किं फलं न किमपीत्यर्थः, अतो वैशेषिकमतस्य मुमुक्षूणां प्रयोजनाभावादनादरणीयत्वमेव नि-

श्रितीमिति भावः ॥ ३ ॥

ननु साधर्म्यवैधर्म्ययोस्तत्त्वज्ञानकारणत्वात्तत्प्रतिपादकत्वेन वैशेषिकस्य सप्रयोजनत्वमस्त्वित्याशङ्क्यास्मदीयतत्त्वे साधर्म्यवैधर्म्याभावाद्वैशेषिकस्याप्रयोजनत्वमित्याशयेनाह ।

कथं साधर्म्यवैधर्म्ये तत्त्वज्ञानस्य कारणम् ।
न च साधर्म्यवैधर्म्यमद्वये परमात्मनि ॥ ४ ॥

कथमिति । साधर्म्यवैधर्म्ये साधर्म्य सह धर्मधर्मिभाववत्त्व वैधर्म्य तद्रहितत्व चैते उभे तत्त्वज्ञानस्य मोक्षसाधनभूतस्य पारमार्थिकतत्त्वज्ञानस्य कारण हेतु' कथ केन प्रकारेण भवतो न कथमपीत्यर्थ , कुत इत्यत आह न चेति, अद्वय न विद्यते द्वय भेदो यत्र तस्मिस्तथाभूते परमात्मनि कार्यकारणातीत आत्मवस्तुनि साधर्म्यवैधर्म्य सहधर्मवत्त्व समानधर्मवत्त्व च वैधर्म्य धर्मराहित्य विरुद्धधर्मवत्त्व च तयोः समाहार एकवद्भावः, न चास्ति नैवास्ति अतो वेदान्तप्रतिपाद्ये ब्रह्मणि साधर्म्यवैधर्म्याभावान्न वैशेषिकस्य तत्र सप्रयोजनत्वमिति भावः ॥ ४ ॥

नन्वात्मतत्त्वविवेचनोपयोगितयैव षट्पदार्थविवेचनमस्माभिः क्रियतेऽतः सप्रयोजनत्व वैशेषिकस्यास्त्वित्याशङ्क्य तदास्मदानुकूल्याद्वैशेषिकसिद्धान्तभङ्गोऽस्माकमिष्टमेव तदित्याशयेनाह ।

पदार्थानां विवेकेन परमात्मा प्रकाशते ।
इति चेद्वदसि प्राज्ञ तर्हीद मम सम्मतम् ॥ ५ ॥

पदार्थानामिति । पदार्थाना वैशेषिकप्रतिपादितानां षट्पदार्थाना नामरूपात्मकाना विवेकेन विवेचनेन भिन्नत्वज्ञानेन

परमात्मा कार्यकारणत्वहीन आत्मा प्रकाशते स्फुटं प्रतीतो भवति अतो वेदान्तानुकूल्याद्वैशेषिकमतमङ्गीकार्यमित्येव वदसि कथयसि चेद्यदि तर्हीदं मतं मम मुमुक्षोः सम्मतामष्टमेव न त्वयं वैशेषिकसिद्धान्तः किन्त्वस्मदीय एवेति भावः ॥ ५ ॥

ननु वैशेषिकैस्तार्किकैश्च नानात्मत्वं प्रतिपाद्यते वेदान्तिभिस्तु ताद्रूद्ध्यमेकात्म्यमतं कथमविरोध इत्याशङ्क्य व्यवहारदशायां बद्धमुक्तव्यवस्थायै नानात्मत्वस्य तैरङ्गीकृतत्वाद्वेदान्तिभिरपि व्यावहारिकनानात्मत्वस्य मायिकस्याङ्गीकृतत्वात्पारमार्थिकमैकात्म्यमुभाभ्यामपि सिद्धान्तितमतो न विरोध इत्याशयेनाह ।

बद्धमुक्तव्यवस्थायां नानात्मानो न वस्तुतः ।
नानात्मानो व्यवस्थान इत्याह मुनिगौतमः ॥ ६ ॥

बद्धमुक्तेति । बद्धमुक्तव्यवस्थायां बद्धानां मुक्तानां च व्यवस्था मर्यादा तस्या निमित्तभूतायां सत्यां तन्निमित्तमित्यर्थः, नानात्मानो नानाऽनेक आत्मानो जीवाः सन्ति वस्तुतः परमार्थतो नानेके सन्तीत्यर्थः, इत्येव तार्किकाणां वैशेषिकाणां च मतं तद्वेदान्तिनामप्यनुकूलमिति भावः, ननु तार्किकवैशेषिकयोर्मते बद्धमुक्तव्यवस्थायामेव नानात्मत्वं न परमार्थत इति कुतो ज्ञातं भवतेत्याशङ्क्य गौतमप्रणीतसूत्राद्वेवेत्याशयेन गौतमसूत्रोदाहरणेन गौतमाशयं प्रदर्शयति नानात्मान इति, नानात्मानो नाना बहवो आत्मानो जीवाः सन्ति व्यवस्थाने व्यवस्थाने व्यवस्था बद्धमुक्तानां मर्यादेत्यर्थः, तस्मिन्तन्निमित्तमित्यर्थः, चर्मणि द्वीपिनं हन्तीति वन्निमित्ते सप्तमी, इत्येव मुनिगौतमो मुनिर्मननवान्गौतमनाम ऋषिराह प्रोक्तवानतो स्माभिर्ज्ञातमिति भावः ॥ ६ ॥

किञ्च तेषां मते कल्पनालाघव साध्यते तदपि तेषां कल्पनागौरवमेव सिध्यति, वेदान्ते तु मायाङ्गीकारे कल्पनालाघव सिध्यत्यतस्तेषामपि मायातत्त्वाङ्गीकार इष्टएवेति वेदान्ताङ्गीकार कर्त्तव्य इत्याशयेनाह ।

कल्पनागौरव दोष कल्पनालाघव गुणः ।
इति यत्तार्किकैरुक्त तदेव मम रोचते ॥ ७ ॥

इति० बो० मु० अष्टा० वैशेषिकनिर्णय ॥ ३ ॥

कल्पनेति । कल्पनागौरव कल्पनाना गौरवमाधिक्य दोषोऽचातुरी कल्पनालाघव कल्पनाना लाघव न्यूनत्व गुणश्चातुर्यमित्येव यत्प्रसिद्ध तार्किकैरुक्त न्यायशास्त्रविद्भि कथितमेव केवल न तु अङ्गीकृत मायाङ्गीकार विना तत्र न सिध्यतीति भाव', मम तु मायातत्त्वाङ्गीकर्तुस्तदेव कल्पनालाघमेव रोचत इष्ट भवति अतस्तर्कवैशेषिकमतादर परित्यज्य वेदान्त एवादरो विधेय इति भाव ॥ ७ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ मुनीन्द्रदिनचर्यार्थप्रकाशेऽष्टादशविद्यास्थाननिर्णयार्थ प्रकाशान्तर्गतो वैशेषिकनिर्णयार्थप्रकाश स्तृतीय ॥ ३ ॥

अथ साङ्ख्यनिर्णय ।

एव वैशेषिकनिर्णयमभिधायेदानी प्रसङ्गप्राप्त साङ्ख्यनिर्णयाख्य चतुःश्लोक प्रकरणमभिदधान आह ।

अथ साङ्ख्यनिर्णय ।

अथेति । अथ वैशेषिकनिर्णयानन्तर साङ्ख्यनिर्णयः साङ्ख्यस्य साङ्ख्याभिधशास्त्रस्य निर्णयो विचारः क्रियत इति शेषः, तत्र

तावत्प्रथम सख्यातीतस्य ब्रह्मणः केवलतत्त्वसंख्यामात्रनिर्णायकसाख्यविषयत्वाभावात्सांख्यस्य निष्फलश्रमत्व दर्शयति ।

असंख्याः साख्य तत्त्वाना सख्याः संख्यातत्वानसि ।
किं साख्य सख्यया ब्रह्म संख्यातीत विचिन्तय ॥१॥

असख्या इति। हे साख्य सम्यक्ख्यायन्ते प्रकथ्यन्ते तत्त्वान्यास्मन्तत्सांख्य तद्वेत्ति अधीते वा सांख्यस्तस्य सम्बोधने हे साख्य त्व तत्त्वानां प्रकृतिपुरुषादीनामसङ्ख्या नविद्यन्ते सङ्ख्या गणना यासा तास्तथोक्ताः सङ्ख्या गणनाः पञ्चविंशतिषड्विंशत्यादिरूपाः सङ्ख्यातवान्निरूपितवानसि विद्यसे तर्हि साङ्ख्यसङ्ख्यया साङ्ख्यशास्त्रनिरूपितया सङ्ख्यया गणनया किमस्माक मुमुक्षूणां कि फल न किमपि फलमित्यर्थः, अतः साङ्ख्यस्यापि निष्फलश्रमत्वात्साङ्ख्यादर परित्यज्य ब्रह्मचिन्तने प्रवर्तितव्यामति साङ्ख्यं प्रेरयति ब्रह्मेति, त्व ब्रह्म देशकालवस्तुकृतपरिच्छेदरहितमात्मवस्तु विचिन्तय स्मर, ननु साङ्ख्यविचारेणापि ब्रह्मैव चिन्त्यत इति चेन्नेत्याह सङ्ख्यातीतामति, सङ्ख्यातीत साङ्ख्योक्तसङ्ख्यया विषयीकृत न भवति ब्रह्माऽन. साङ्ख्यस्य निष्प्रयोजनश्रममात्रत्वात्तत्यक्त्वा पर ब्रह्मैव चिन्तनीयमिति भावः ॥ १ ॥

ननु तत्त्वज्ञान मोक्षसाधनत्वेन भवतामपीष्ट साङ्ख्य च तत्त्वज्ञानप्रतिपादक तत्कुतः साङ्ख्य नाङ्गीक्रियते भवद्भिरित्याशङ्क्याह ।

तत्त्वज्ञानं त्वया प्रोक्तं तत्त्वज्ञान मत मम ।
तत्त्वातीतस्य विज्ञानं तत्त्वज्ञान हि मुक्तये ॥२॥

तत्त्वज्ञानमिति । हे साङ्ख्य त्वया भवता तत्त्वज्ञानं तत्त्वानां

प्रकृतिपुरुषादीना ज्ञान बोधनं प्रोक्त कथित मम मे मुमुक्षो-स्तत्त्वज्ञानं तत्त्वबोधनमेव मतामिष्ट तथापि त्वत्प्रतिपादित त-त्त्वज्ञान न मोक्षसाधन तर्हि तत्कीदृशं मोक्षसाधन तत्त्वज्ञान तत्राह तत्त्वातीतस्येति, तत्त्वातीतस्य तत्त्वेभ्यो भवदुक्तप्रकृतिपु-रुषादितत्त्वेभ्योऽतीतस्य भिन्नस्य तत्त्वास्पृष्टस्येत्यर्थः, विज्ञा-नमनुभवस्तत्त्वज्ञान तत्त्वस्यानारोपितस्वरूपस्य जीवब्रह्मैक्यल-क्षणस्य ज्ञान बोधनमस्माकमिष्ट तदेव मुक्तये मुक्त्यर्थं भवति न त्वत्प्रोक्त मुक्तये तत्त्वज्ञान भवतीत्यर्थः, अतस्तन्नाङ्गीक्रियते-ऽस्माभिरिति भाव ॥ २ ॥

ननु तत्त्वविवेचन पुरुषज्ञानार्थमस्माभिः कृतमित्याशङ्क्या-ङ्गीकरोति ।

पुरुषस्य परीक्षार्थं मया सख्या निरूपिता ।

साख्य एव यदि प्राह तर्हीद मम समतम् ॥ ३ ॥

पुरुषस्येति । पुरुषस्य प्रकृतिविकृतिविलक्षणस्यासङ्गस्या त्मनः, तदुक्त ।

'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।

षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः' इति ॥

परीक्षार्थं ज्ञानार्थं मया साङ्ख्यशास्त्रप्रणेत्रा सङ्ख्या तत्त्वानां प्रकृत्यादीनां पञ्चविंशतिषड्विंशत्याद्या निरूपिता प्रतिपादिते-वमनेन प्रकारेण यदि यर्हि साङ्ख्यः साङ्ख्यशास्त्रप्रणेता कपिलस्तदध्ययनवान्तज्ज्ञो वाऽन्यः कोपि प्राह वक्ति तर्हि तदेद वचन साङ्ख्यापसिद्धान्तापातेन त्वंपदार्थशोधनमात्रो-पयोगितया च मम मुमुक्षोः समतमिष्ट भवति भवान्साङ्ख्यसि-द्धान्त परित्यज्य वेदान्त आगत इति भावः ॥ ३ ॥

तर्हि तत्त्वसङ्ख्यायाः पुरुषपरीक्षामात्रोपयोगित्वाङ्गीकारे

तत्रैवाभिनिवेशो न कर्त्तव्य इत्याह ।

पुरुषान्नपरं किञ्चित्सा काष्ठा सा परा गतिः ।
पुरुषं पश्य रे सांख्य सङ्ख्यया किं प्रयोजनम् ॥ ४ ॥

इ० बो० मु० अष्टा० साङ्ख्यनिर्णयश्चतुर्थः ॥ ४ ॥

पुरुषादिति । पुरुषादमङ्गसच्चिदानन्दपरिपूर्णरूपादात्मनः परं श्रेष्ठं किञ्चित्किमपि न न विद्यते सैव काष्ठा सर्वसुखावधिरूपा मोक्षलक्षणा परोत्कृष्टा गतिः स्थितिर्ज्ञेया, अरे साङ्ख्य सङ्ख्यायामभिनिवेशित्वान्नीचसम्बोधनं त्वं पुरुषं परिपूर्णरूपमात्मानं पश्यावलोकय तं त्यक्त्वा सङ्ख्यया तत्त्वानां गणनया किं प्रयोजनं किं फलं न किमपीत्यर्थः, अतः सङ्ख्याभिनिवेशेन व्यर्थश्रमो न कर्त्तव्य इति भावः ॥ ४ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीपिकायां मुनीन्द्रदिवाचर्यार्थप्रकाशोऽष्टादशविद्यास्थाननिर्णयार्थप्रकाशान्तर्गतः साङ्ख्यनिर्णयार्थप्रकाशश्चतुर्थः ॥४॥

अथ पातञ्जलनिर्णयः ।

एवं साङ्ख्यनिर्णयमभिधायेदानीं पातञ्जलयोगं निर्णेतुं पातञ्जलनिर्णयाख्यं दशश्लोकं प्रकरणमभिदधान आह ।

अथ पातञ्जलनिर्णयः ।

अथेति । अथ साङ्ख्यनिर्णयानन्तरं पातञ्जलनिर्णयः, पतञ्जलिना प्रोक्तं पातञ्जलं शास्त्रं तस्य निर्णयो विचारः क्रियत इति शेषः, पातञ्जलमित्यत्र 'तेन प्रोक्तमि'तिसूत्रेणाण्, तत्रादौ योगसिद्धिप्रसक्त्या श्रमहेतुत्वे मुमुक्षूणामादरं स्राजयितुं पातञ्जलस्य दर्शयति ।

योगसिद्धिप्रसक्तोय पातञ्जलपरिश्रमः ।
कलाकौशलमेवेद न स्वरूपस्थितिर्हि सा ॥ १ ॥

योगसिद्धीति । अय पतञ्जलिप्रोक्तो योगाख्य परिश्रम. सर्वकाल श्रम एव यतो योगसिद्धिप्रसक्तो योगाना धारणाविशेषाणा सिद्धय आकाशगमनाद्यास्तासु प्रसक्तोऽत्यासक्तोऽतः पातञ्जलपरिश्रमः पातञ्जले पतञ्जलिप्रोक्ते शास्त्रे परिश्रम एव केवल ज्ञेयो न तत्रोक्तसाधनैर्मोक्ष इति भाव, तर्हि किं तत्रत्यसाधनैर्भवतीत्याशङ्क्याह कलेति, इद पातञ्जल कला कौशलमेव कलासु योगसिद्धिषु कौशल कुशलत्व चातुर्यमात्र केवलमित्यर्थ, सा कुशलता न स्वरूपस्थिति' स्वस्यात्मनो रूप तस्य स्थितिस्तदाकारा स्थितिरित्यर्थः, न न भवति हि एतद्विवेकिना प्रसिद्धम् ॥ १ ॥

कायव्यूहसिद्धिप्रसक्त्या योगाभ्यासप्रसक्त प्रत्याह ।

रे योगसिद्ध जीवाना कायव्यूहो न दुर्लभः ।
विदेहमुक्तता सिद्धिः कायव्यूहो न सिद्धये ॥२॥

रे योगसिद्धेति । रे योगसिद्ध रे इति नीचसम्बोधने योगसिद्धिप्रसक्तत्वान्नीचत्व हे योगसिद्ध्यासक्त जीवाना जीवत्व प्राप्तानां कायव्यूह कायानां देहाना व्यूह समूहो न दुर्लभो न दुःष्प्राप किन्तु सुलभ एवेत्यर्थः, ननु योगाभ्यासे न विना जीवाना कायव्यूहो दुर्लभ एवेति चेन्न भ्रमजन्यत्वात्स्वाप्नमानोरथिकप्रपञ्चादावनन्तदेहाना तदीयत्वेन दर्शना ज्जाग्रत्प्रपञ्चस्यापि विचारदृष्ट्या हिरण्यगर्भस्वप्नत्वात्तैजसहिरण्यगर्भयोरभिन्नत्वस्य पारमार्थिकत्वात्स्वप्नत्वस्य तुल्यत्वे कायव्यूहत्वसिद्धेः सुलभत्व कायव्यूहस्य जीवानामपि भाव,

ननु तर्हि तत्र तत्र वेदान्ते तत्त्वज्ञानात्सिद्धिरवाप्यत इत्युच्यते तत्कथं सिद्धिर्निन्द्यते भवद्भिरिति चेत्तत्राह विदेहेति, विदेह-मुक्तता देहरहितत्त्वेन ब्रह्मरूपतया स्थितिरेव सिद्धिः सिद्धि शब्देनाभिहिता वेदान्ते कायव्यूहः शरीरसमूहधारणेनाने-कभोगभोगो न सिद्धये मुक्तये न भवतीति तत्र तत्र वेदान्ते निश्चितमिति भावः ॥ २ ॥

एवं कायव्यूहसिद्धिं विदूष्येदानीं परकायप्रवेशरूपां सिद्धिं दूषयन्परकायप्रवेशसिद्धीच्छया योगाभ्यासासक्तं प्रत्याह।

हे योगसिद्ध जानासि परकायप्रवेशनम् ।
परं तु नैव जानासि परकायप्रवेशनम् ॥ ३ ॥

हे योगसिद्धेति । हे योगसिद्ध हे योगधारणया सिद्धं-मन्य त्वं परकायप्रवेशनं परेषामन्यप्राणिनां कायेषु देहेषु प्र-वेशनं प्रवेशयुक्तिं जानासि वेत्सि तथाप्ययमभिमान एव तव परकायप्रवेशनं नैव वेत्सि कुत इत्यत आह परं त्विति, परन्तु तथापि त्वं परकायप्रवेशनं परं परमात्मानं कायति वक्ति भा-गलक्षणयोपदिशतीत्यर्थः, तत्परकायं महावाक्यजातं तत्त्वमस्या-दिरूपं तस्मिन्दृढमोक्षेच्छया प्रवेशनं तदर्थावगाहनं, यद्वा परका-येन महावाक्योपदेशेन प्रवेशनं प्रवेशोऽर्थाद्वात्मनीत्यवगन्तव्यं तन्नैव जानासि नैव वेत्सीति मन्येहम् ॥ २ ॥

ननु मास्तु महावाक्यद्वारात्मनि प्रवेशनमन्यशरीरप्रवेश-रूपा सिद्धिस्तु वर्त्तत एव ममेत्याशङ्क्याह ।

भूतादयोपि जानन्ति परकायप्रवेशनम् ।
सा सिद्धिर्नैव बन्धः सा यद्धि कायप्रवेशनम् ॥२॥

भूतादय इति । भूतादयो भूताः पिशाचा आदयो मुख्या येषां ते रोगज्वरादयोऽप्यादिशब्देन ग्राह्यास्ते परकायप्रवेशनं परेषामन्यप्राणिनां कायेषु प्रवेशन प्रवेशयुक्तिं जानन्ति विन्दन्ति तद्योनिप्रापकेन क्षुद्रकर्मणापि तादृशयोनिप्राप्त्या मा स्यादेवाऽतस्तदर्थं महांश्चित्तावरोधयोगरूप प्रयासो नैवापेक्षितोऽतस्तयैव न कृतार्थतेति भावः, ननु परकायप्रवेशरूपा सिद्धिर्योगफलमेवातः कुतो भवद्भिर्निन्द्यत इति चेत्तत्राह सेति, यत्प्रसिद्ध कायप्रवेशन काये शरीरे प्रवेशन प्रवेश इति सा कायप्रवेशरूपा नैव सिद्धिर्नैव मुक्तिर्भवति किन्तु सा परकायप्रवेशरूपा बन्धो बन्धनमेव भवति हि प्रसिद्धमिद सर्वशास्त्रेषु विवेकिषु चात. परकायप्रवेशासाद्धसाधनभूतयोगधारणासक्तिं परित्यज्य मोक्षसाधनभूते वेदान्तश्रवणादावेव प्रवर्त्तितव्यमिति भावः ॥ ४ ॥

एव परकायप्रवेशादर परित्याज्य चिरजीवितासिद्धिकारणभूतयोगधारणासक्त प्रत्याह ।

अवश्य मरणं तर्हि कीदृशी चिरजीविता ।
जन्ममृत्युजराध्वंसि त्वं विज्ञानामृतं पिब ॥ ५ ॥

अवश्यमिति । हे योगसिद्ध यत्र चिरजीवनेऽवश्यं निश्चयेन मरण मृत्युर्भवति तर्हि तदा सा चिरजीविता बहुकाल जीवनता कीदृशी कथ सिद्धा न कथमपीत्यर्थ, यथा जन्मतो मरणान्त रुग्णस्य समाशत जीवनमपि न तज्जीवनत्वेन गृह्यते विवेकिभिरैहिकपारलौकिकभोगसाधनकर्माचरणाशक्त्या मरणतुल्यत्वात्तथा मरणभीत्या योगधारणायां स्थितः सन् चिरजीवित्व साधित तत्राप्यन्तेऽवश्य मरणे सिद्धे निरन्तरं

तत्प्रतीत्या तद्व्ययेन निरन्तर धारणायामेव स्थितस्यैहिकभोगसाधनव्यवहारे प्रवृत्त्ययोगेन भोगाभावाद्योगधारणायाश्च चिरजीवित्वासिद्धिफलकत्वे चरितार्थत्वात्तस्या अन्यलोकभोगफलकत्वाभावाच्च तदन्यधर्मादिसाधनाचरणासिद्धेश्च पारलौकिकभोगाभाववत्त्व तस्या मोक्षसाधनश्रवणाद्यनुष्ठानासिद्धेश्चैतादृशाचरजीवित्वस्य चिररुग्णत्वसाम्याच्चिरमरणमेव तदितिज्ञात्वा तस्मिंस्तद्धारणाया चानादरो मुमुक्षुभिः कर्त्तव्य इति भावः, ननु तर्हि मरणनिवृत्तेरेव मोक्षत्वान्मोक्षस्य च भवतामपीष्टत्वाच्चिरजीवित्व भवतामपीष्टमतः कुतो निन्द्यते तत्राह जन्मेति । त्व भव जन्ममृत्युजराध्वंसि जन्म सदद्वैतानृतद्वैतयोरन्योन्यस्मिन्नन्योन्यारोपरूपमन्योन्यधर्मारोपरूप चेति लक्षित जन्म तथा मृत्युरपि विवेकेन सदद्वैतानृतद्वैतयोर्विवेचनेन पृथक्त्वावलोकनरूप मरणमिति लक्षितो मृत्युर्लोकप्रसक्ते जन्ममरणे वा जरा वार्धक्य तेषा विध्वंसि नाशक विज्ञानामृत विज्ञान जीवब्रह्मैक्यसाक्षात्काररूप तदेवोभयलक्षणमरणनिवर्त्तकत्वादमृतमिवामृत मोक्षरूप तदेवास्माकमिष्ट तत्त्व पिब प्राशयाङ्गीकुर्वित्यर्थ, मुमुक्षूणामिष्टो मरणनिवृत्तिरूपो मोक्षो ज्ञानेनैव साध्यः स एवात्यन्तमरणनिवृत्तिरूपः परमपुरुषार्थरूप', ननु एकदेशिकया कयाचिद्योगधारणया चिरजीविताऽतस्तदादर परित्यज्य मुमुक्षुभिर्वेदान्तश्रवणादिष्वेवादरः कर्तव्य इति भावः ॥ ५ ॥

एव चिरजीवित्वसाधनभूतयोगधारणा विदूष्येदानी पर चितस्थितवस्तुज्ञतारूपसिद्धिसाधनधारणारत प्रत्याह ।

परचित्तस्थितं वस्तु त्वया ज्ञात ततश्च किम् ।

स्वचित्तसंस्थित वस्तु पर ब्रह्म विलोकय ॥ ६ ॥

परेति । त्वया हे योगिन् भवता धारणावता परचित्तस्थित परेषामन्यप्राणिना चित्तान्यतःकरणानि तेषु स्थित चिन्त्यतया वर्त्तमान वस्तु पदार्थजात ज्ञातमवबुद्ध ततश्च ततो ज्ञानादपि तव किं किं फल न किमपीत्यर्थः, परमात्मनोन्यत्कल्पित चित्त तत्रस्थ वस्त्वपि कल्पितमतस्तत्सर्वेषामप्यस्ति अतस्तावन्मात्रेण कृतार्थता नैव मतव्या तदर्थ महान्यागरूपः प्रयासश्च नैव कर्त्तव्य इति भाव', तर्हि किंकर्त्तव्यमित्यत आह स्वेति, स्वचित्तसस्थित स्वस्य चित्तमन्तःकरण तत्र संस्थित वस्तु सत्यरूप पर ब्रह्म कार्यकारणत्वरहित देशकालवस्तुकृतपारच्छेदशून्मात्मस्वरूप विलोकय साक्षात्पश्य स्वत. पृथक्तया भ्रान्तिसिद्ध समष्टिव्यष्ट्यन्तःकरण तत्र स्थितभ्रमरूपजगद्विषयकज्ञानस्यापि भ्रमरूपत्वादस्माक तेनापि प्रयोजन नास्ति तर्हि तदेकदेशव्यष्ट्यन्त करणस्थपरचित्तस्थितवस्तुज्ञानरूपसिद्ध्या प्रयोजन नास्तीति किं वक्तव्यमतस्तदादर परित्यज्य स्वचित्तबाधेन स्वचित्तस्थितब्रह्मसाक्षात्कारसाधनेषु वेदान्तश्रवणादिष्वेवादरो मुमुक्षुभिः कर्त्तव्य इति भावः ॥ ६ ॥

इदानीं दूरश्रवणदर्शनाख्यसिद्धिसाधनभूतधारणाभ्यासरत प्रत्याह ।

निकटस्थस्यात्मनश्चेन्न स्याच्छ्रवणदर्शनम् ।
का सिद्धि सा तु या सिद्धिर्दूरश्रवणदर्शनम् ॥७॥

निकटेति । अत्यन्ताव्यवहितत्वान्निकटस्थस्यातिसमीपवर्तिन आत्मनः स्वात्मनः स्वात्मवस्तुनः श्रवणदर्शन श्रवणमित्युपलक्षण मनननिदिध्यासनयोः, तद्द्वारा दर्शन च साक्षा-

स्कारस्तयोः समाहार एकवद्भावः, न स्याच्चेन्न भवेद्यदि तर्हि या तु योगशास्त्रे प्रसिद्धा दूरश्रवणदर्शन दूरस्थपुरुषाद्युच्चारितशब्दाना श्रवणं तथा दूरस्थितपदार्थाना दर्शनमवलोकन चेति सिद्धिर्विभूतिरस्ति सा का न सा सिद्धिर्गणनार्हेत्यर्थः, दूरश्रवणदर्शनरूपसिद्ध्योरनात्मविषयत्वेन मिथ्यात्वात्तदभ्यासस्य च व्यर्थश्रमत्वात्तदादर परित्यज्यात्मविषयकवेदान्तश्रवणमनननिदिध्यासनेष्वेव प्रयत्नः कर्त्तव्यो नान्यत्रेति भावः ॥ ७ ॥

एव दूरश्रवणदर्शनाख्ये सिद्धी प्रत्याख्यायेदानीमाकाशगमनाख्यसिद्धीच्छया तत्साधनभूतयोगधारणाभ्यासासक्तं प्रत्याह ।

भवन्ति वायसादीनामपि खेचरतादय' ।
सिद्धिभिर्नैव सिध्येत सिद्धिभिः कि प्रयोजनम् ॥८॥

भवन्तीति । खेचरतादयः खेचरताऽऽकाशगतित्वमादिर्येषामन्तर्धानप्रभृतीनां तास्तथोक्तास्ताः सिद्धयो वायसादीनामपि वायसः काक आदिर्येषा श्येनभासगरुडादीनां तेषामपि विना योगधारणा भवन्ति प्राप्नुवन्ति काकादीनामपि विना योगधारणमाकाशगमनसिद्धेरपिशब्दाद्भूतादीनामपि विना योगधारणामन्तर्द्धानादिसिद्धेः प्रत्युत तेषां योनिप्राप्तेरविहितकर्मफलत्वेन तुच्छत्वान्न तत्रादरो मुमुक्षुभिर्विधेय इति भावः एवमेव सर्वसिद्धीनामपि निष्प्रयोजनत्व दर्शयति सिद्धिभिरिति, सिद्धिभिः पातञ्जलोक्ताभिराकाशगमनादिरूपसिद्धिभिर्नैव सिध्येत नैव निश्चयेन मुच्येत तर्हि मुमुक्षूणामस्माक सिद्धिभिः परकायप्रवेशादिरूपाभिः सिद्धिभिः किं प्रयोजन किं फल न किमपीत्यर्थः ॥ ८ ॥

ननु योगसिद्धिरत्र मुक्तिः सा तु भवतामपीष्टातः कुतः सा निन्द्यत इत्याशङ्क्याह ।

न सिद्धिर्योगसिद्धिर्हि बलवीर्यादिसिद्धिकृत् ।

एतेन योगः प्रत्युक्त इति वेदान्तभाषितम् ॥९॥

नेति । हि यस्मात्कारणाद्योगसिद्धिर्योगधारणाभिर्या सिद्धिर्जायते सा न सिद्धिर्न मुक्तिर्वेदान्ते मुक्तिरेव सिद्धिपदेनोक्ता नाकाशगमनादिरूपोक्ता सिद्धिशब्देनेत्यर्थः, सा योगसिद्धिस्तु योगधारणया या सिद्धिर्जाता सा बलवीर्यादिसिद्धिकृद्बलं च शरीरदार्ढ्यं वीर्यं च शुक्रभूयस्त्वं गतपभूयस्त्वं च ते आदिनी येषामन्तर्धानोर्ध्वरेतस्त्वादीनां तेषां सिद्धिः प्राप्तिस्तस्याः कर्त्री भवति न तु मुक्तिकृदित्यर्थः, अतो मुमुक्षुभिस्तत्रासक्तिर्नैव कार्येति भावः, ननु योगप्रत्याख्यानं स्वकपोलकल्पितत्वादप्रमाणमित्याशङ्क्य तत्र श्रीबादरायणसूत्रं प्रमाणयति एतेनेति, 'एतेन योगः प्रत्युक्तः' एतेन साङ्ख्यप्रत्याख्यानेन योगो योगसिद्धान्तः प्रत्युक्तः प्रत्याख्यातो न पृथक्प्रयासः कर्त्तव्य इति भावः, इति एव वेदान्तभाषितं वेदान्त उपनिषदर्थसंग्राहके शारीरकसूत्रेषु मध्ये भाषितं कथितमस्तीति शेषः, अतो योगमतखण्डनमिदं मुमुक्षुभिः प्रमाणपूर्वमस्तीति ज्ञेयमिति भाव ॥९॥

नन्वात्मज्ञानमेव सिद्धिपदवाच्यं योगशास्त्रे प्रतिपादितमन्यसिद्धयस्तत्साधनभूतधारणाविशेषाश्च तत्तज्ज्ञानपूर्वकं तत्त्यागायैवेत्याशङ्क्यैतच्च मतं वेदान्तानुकूल्यादस्माकमिष्टमेवेति योगसिद्धान्तापहतिरित्याशयेनाह ।

सिद्धिरात्मपरिज्ञानमन्तरायास्तु सिद्धयः ।

इति चेद्योगवित्प्राह मतमस्माकमेव तत् ॥ १० ॥

इ० बो० मु० पु० अष्टा० पातञ्जलनिर्णय पञ्चम ॥ ५ ॥

सिद्धिरिति । आत्मपरिज्ञानमात्मनो ब्रह्माभिन्नस्य प्रत्यगात्मनः परिज्ञानं बोधः स एव सिद्धिः सिद्धिशब्देनोक्ता. सिद्धयस्तु तदन्याऽऽकाशगमनादिरूपा. सिद्धयोऽन्तराया आत्मज्ञानस्य विघ्नरूपाः सन्ति अनस्तास्तत्र तज्ज्ञानपूर्वं तत्त्यागायैवाभिहिता इति भावः, इत्येव योगविद्योगतात्पर्यवेत्ता कश्चित्प्राह वक्ति चेद्यदि तर्हीदं तदिदं मतं मम वेदान्तिनः समतमिष्टं न तु योगसिद्धान्तः स इति भावः ॥ १० ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ मुनीन्द्रदिनचर्यार्थप्रकाशे पुराणश्रवणनिर्णयेऽष्टादशविद्यास्थाननिर्णयप्रकाशान्तर्गतः पातञ्जलनिर्णयार्थप्रकाशः पञ्चमः ॥ ५ ॥

अथ मीमांसानिर्णयः ।

एवं पातञ्जलनिर्णयमभिधायेदानीं मीमांसानिर्णयमभिधातुं मीमांसानिर्णयाख्यं सप्तश्लोकं प्रकरणमभिधास्यन्नाह ।

अथ मीमांसानिर्णयः ।

अथेति । अथ पातञ्जलनिर्णयानन्तरं मीमांसानिर्णयो मीमांसाया निर्णयो विचारः क्रियत इति शेषः, तत्र तावत्प्रथमं तन्मताग्र्यत्वज्ञापनाय तन्मौढ्यं दर्शयति ।

कष्टं कर्मेत्ययं न्यायो मतो मीमांसकस्य चेत् ।
आत्मैनं क्लेशभागित्वं तेनैवांगीकृतं तदा ॥ १ ॥

कष्टमिति । कष्टं कर्मेत्ययं कर्म क्रिया कष्टं दुःखरूपमस्तीति शेषः, अयमुक्तः प्रसक्तो न्यायः सिद्धान्तो मीमांसकस्य मीमांसाशास्त्रज्ञस्य जैमिनेर्मतं इष्टश्चेद्यदि भवेत्तदा तर्हि आत्मनः स्वस्य कर्मकर्तृत्वाभिनिवेशवतः क्लेशभागित्वं दुःखभोक्तृत्वं तेनैव मीमांसकेनैव कोशकारक्रिम्यादिनेवाङ्गीकृतं भवेदिति भ

ष', सर्वशास्त्रेषु सुखस्यैवेष्टत्वेन प्रतिपादनात्सर्वजनेषु सुखस्यैवे-ष्टत्वेनानुभूयमानत्वाच्चाहो मीमांसकस्यातीव मौढ्यं सिद्धं यत् कर्मणो दुःखरूपत्वं निश्चित्य तस्यैवेष्टत्वेनाङ्गीकरणमिति तत्तस्यापि मूर्खत्वमन्येषामपि तद्वचनविश्वासेन तत्र प्रवृत्तानामपि मूर्खत्वमेवेति न तत्रादरो मुमुक्षुभिः कर्त्तव्य इति भाव ॥१॥

ननु तर्हि कष्टं कर्मेति वदतः कोऽभिप्राय इत्याशङ्क्याह ।

मीमांसकः सत्यमाह कष्टं कर्मेति कर्मवित् ।
तर्हि तस्यापि जिज्ञास्यं ब्रह्मानिष्टनिवृत्तये ॥ २ ॥

मीमांसक इति । मीमांसको मीमांसाशास्त्रप्रणेता जैमिनिः कष्टं कर्मेति कर्म क्रिया कष्टं दुःखमेव केवलमस्तीत्येवमाह कथितवान्यत्तत्सत्यं तथ्यमेव नानृतमित्यर्थः, यतोऽसौ जैमिनि कर्मवित्कर्मणः क्रियाया वेत्ता ज्ञाताऽस्ति कर्मारम्भकाले दुःखं प्रसिद्धमेव सर्वेषां फलं च दुःखरूपं जन्ममरणरूपं तत्र भोगानामपि ऽप्राप्तौ तत्प्राप्तौ च तद्रक्षणन्यूनत्वनाशस्वतोन्यभोगाधिक्यदर्श-नादिभिः दुःखमेवेति तत्रादरो न कर्त्तव्य इत्ययमाशयो जैमिने-रिति भावः, तर्हि तदा कर्मणो दुःखरूपत्वे ज्ञाते सति तस्य मी-मांसकस्यापि मुमुक्षूणां किं वाच्यमित्यपेरर्थः, अनिष्टनिवृत्तयेऽन-निष्टस्य निवृत्तये नाशाय परमानन्दप्राप्त्या सर्वदुःखानि नाशयि-तुमित्यर्थः, ब्रह्म भूमशब्दवाच्यं परमानन्दरूपं ब्रह्म केवलं नान्य-त्कर्म वा तत्फलं च वा जिज्ञास्यं जिज्ञासितुं योग्यमस्तीति शेषः, अतो मुमुक्षुभिः कर्ममीमांसाया नैवादरः कर्त्तव्य इति भाव ॥२॥

ननु कर्मणो विषयजन्यसुखसाधनत्वेनेष्टत्वं स्वतो दुःखरू-पत्वेऽप्यस्तु अतस्तत्रादरो विधेय एवेत्याशङ्क्य जन्ममरणादिरूप-कर्मफलस्यातीव दुःखरूपत्वेन सर्वजनेष्वनुभूयमानत्वाद्विषया

णामपि तत्फलभूतानां दु खग्रस्तत्वेन दु खरूपत्वाच्च स्वतोऽपि दुःखरूपत्वात्कर्मणो नादरविषयतत्याशयेनाह ।

कर्मणा सभवेज्जन्म जन्मना कर्मसभव ।
तर्हि कर्मजडस्यास्य जन्ममुक्तिः कथ भवेत् ॥ ३ ॥

कर्मणेति । कर्मणा विहितनिषिद्धादिरूपया क्रियया जन्म जनन मरणस्याप्येतदुपलक्षण सम्भवेत्स्यात्तनश्च जन्मना धृतेन कर्मसम्भव कर्मणा विहितनिषिद्धादिरूपणां क्रियाणा सम्भव उत्पतिर्भवतीति शेष, तर्हि जन्ममरणरूपदुःखफलत्वेन कर्मण स्वतोऽपि दु खरूपत्व सिद्ध तत्रैवाभानवेशवतो मीमासकस्य मौर्ख्यस्यातिशयात्कर्मजडस्य कर्मणीष्टानिष्टज्ञानशून्यत्वेन प्रवृत्तस्यास्य मीमासकस्य जन्ममुक्तिर्जन्ममरणरूपाद् दुःखान्मुक्तिर्मोक्ष कथ केनोपायेन भवेत्स्यान्न केनापीत्यर्थ ॥३॥

ननु कर्मणो जन्मफलकत्व कुतो ज्ञानमित्याशङ्क्य ज्ञानकर्मणो मोक्षजन्मफलकत्वस्य सिद्धान्ततत्त्वाद्वित्याशयेनाह ।

मुक्तिप्राधान्यमेवास्ति बोधप्राधान्यवादिनाम् ।
जन्यप्राधान्यमेवास्ति कर्मप्राधान्यवादिनाम् ॥४॥

मुक्तीति । बोधप्राधान्यवादिना बोधस्य जीवब्रह्मैक्यज्ञानस्य प्राधान्य मुक्तिहेतुत्वान्मुख्यत्व वदितु शील येषा ते तथोक्तास्तेषा 'सुप्यजातौ णिनिस्ताच्छील्ये' इति णिनिः, तेषां मुक्तिप्राधान्य मुक्तेर्मोक्षस्य प्राधान्य मुख्यत्वमस्ति विद्यते न तु जन्मप्राधान्यमित्यर्थ', तथा कर्मप्राधान्यवादिनां कर्मणः क्रियायाः प्राधान्य मुख्यत्व ये वदन्ति तच्छीलानामत्रापि णिनि., तेषा जन्मप्राधान्य जन्मनो जननस्य प्राधान्य मुख्यत्वमस्ति विद्यते ॥ ४ ॥

ननु मीमांसकैर्यज्ञाद्यनधिकारिणां निष्कामकर्मणि ज्ञाने वाधिकार इत्युच्यते, तथाहि ।

'ये काणबधिरा मूका अन्धपङ्ग्वादयश्च ये ।
तेषां निष्कामकर्माणि ज्ञानं वापि विधीयते' ॥

इत्यादिनेत्याशङ्क्याह ।

यः स्वयं कर्मजाड्येन यज्ञेष्वनधिकारतः ।
निष्काममशुचिप्रायं जगाद स कथं शुचिः ॥ ५ ॥

य इति । स्वयं मीमांसकः कर्मजाड्येन कर्मणि क्रियायां यज्जाड्यं मौढ्यं तेन कृत्वाऽन्धादीनां यज्ञेषु सोमचयनादिषु अनधिकारतोऽधिकाराभावाद् व्यङ्गत्वेन निष्कामं कामनारहितमशुचिप्रायं स्वतः प्रायशोऽशुद्धमन्धाद्यधिकारेण तदित्येव जगाद कथितवान् स कर्मजडः कथं केन प्रकारेण शुचिः शुद्धः स्यान्न कथमपीत्यर्थः, अन्तःकरणशोधककर्मण्यनादरेण न कथमपि शुद्धो भवेदिति भावः ॥ ५ ॥

ननु कर्मणामन्तःकरणशोधकत्वादस्माभिरपि तत्रैव सर्वेषां रुचिमुत्पादयितुं तदाग्रहः क्रियत इत्याशङ्क्यैतदस्मदनुकूलमेवेत्याशयेन कष्टं कर्मेतिन्यायस्य केवलकाम्यकर्मविषयत्वं सिद्धान्तयति ।

शुद्धिकृत्कामनिर्मुक्तं कर्म मीमांसितं वदेत् ।
तत्काम्यकर्ममीमांसा केवलं कष्टरूपिणी ॥ ६ ॥

शुद्धिकृदिति । कामनिर्मुक्तं कामनावर्जितं कर्म वर्णाश्रमविहितं कर्म शुद्धिकृदन्तःकरणशोधकं भवति अतस्तदेवास्माभिर्मीमांसितं विचारितमिति वदेद्ब्रूयाच्चेत्तर्हि केवलं निष्कामकर्मवर्जिता काम्यकर्ममीमांसा काम्यकर्माभिशंसकं शास्त्रं कष्टरूपिणी दुःखरूपैव सिद्धा, काम्यकर्माणि ज्योतिष्टोम-

पुत्रेष्ट्यादीनि पारलौकिकैहलौकिकसुखसाधनभूतानि ज्ञेयानि तेषां मीमांसा विचारप्रक्रियाऽतस्तदादरं परित्यज्य मुमुक्षुभिरन्तःकरणमलनिवृत्तिमात्रसाधनं कर्म नित्यनैमित्तिकरूपमङ्गीकार्यमिति भावः ॥ ६ ॥

निष्कामकर्मणाऽन्तःकरणशुद्धिद्वारा मोक्षसाधनज्ञानप्रापकत्वप्रतिपादनेन वेदान्तानुकूल्यं प्रतिपादयति ।

कर्मभिश्चेतसः शुद्धिः शुद्ध्या विज्ञानमाप्यते ।
इति चेत्कर्मठः प्राह तर्हीदं मम संमतम् ॥ ७ ॥

इति० बो० मु० पु० अ० मीमांसानिर्णयः ।

कर्मभिरिति । कर्मभिः स्वस्ववर्णाश्रमविहिताभिः क्रियाभिश्चेतसोन्तःकरणस्य शुद्धी रागादिमलनिवृत्त्या विचारयोग्यत्वरूपा निर्मलता जायत इति शेषः, तया च शुद्ध्याऽन्तःकरणमलनिवृत्त्या विज्ञानं जीवब्रह्मैक्यसाक्षात्काररूपमहं ब्रह्मास्मीति ज्ञानमाप्यते प्राप्यत इत्येवं कर्मठो मीमांसकः प्राह वदति चेद्यदि तर्हि तदानीमिदं भाषणं मम मे वेदान्तिनः संमतमिष्टं जातमिति शेषः, अस्माकं वेदान्तिनामेवायं सिद्धान्तो न तु मीमांसासिद्धान्तः,

'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेन' इत्यादिश्रुतेः,

'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' इत्यादि स्मृतेश्चेति भावः ॥ ७ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ मुनीन्द्रदिनचर्यार्थप्रकाशे पुराणश्रवणनिर्णयप्रकाशऽष्टादशविद्यास्थाननिर्णयार्थप्रकाशान्तर्गतो मीमांसानिर्णयार्थप्रकाशः षष्ठः ॥ ६ ॥

अथ धर्मशास्त्रनिर्णय ।

एवं मीमांसानिर्णयमभिधायेदानीं धर्मशास्त्रं निर्णेतुं धर्मशास्त्रनिर्णयाख्यं द्विश्लोकं प्रकरणमभिदधान आह ।

अथ धर्मशास्त्रनिर्णयः ।

अथेति । अथ मीमांसानिर्णयानन्तरं धर्मशास्त्रनिर्णयो धर्मशास्त्रस्य निर्णयो विचारः क्रियत इति शेषस्तत्र तावद्धर्मशास्त्रविचारेणापि फलबाहुल्यादनायासेन कर्त्तुं शक्यत्वादऽकरणे प्रत्यवायाभावाच्च मोक्षधर्मस्यैव श्रैष्ठ्यं दर्शयति ।

धर्मशास्त्रविचारेण मोक्षधर्मो महाफलः ।
नेहाभिक्रमनाशोऽस्ति प्रत्यवायो नविद्यते ॥ १ ॥

धर्मशास्त्रेति । धर्मशास्त्रविचारेण धर्मशास्त्रस्य धर्मप्रतिपादकशास्त्रस्य विचारेण विवेकेन कृतेन मोक्षधर्मो मोक्षसाधनभूतो निष्कामधर्मो महाफलो महद्बहु मोक्षरूपं फलं प्रयोजनं यस्य स तथोक्तोऽस्ति अतस्तस्य श्रेष्ठत्वमिति भावः, निष्कामधर्मस्य श्रैष्ठ्ये हेत्वन्तरमाह नेति, इह मोक्षसाधनभूते धर्मेऽभिक्रमनाशोऽअभिक्रमस्य पौर्वापर्यक्रमस्य नाशो विघातोऽनुक्रमनाशजन्यो दोष इत्यर्थ, नास्ति न विद्यतेऽन्यत्र काम्यधर्मेषु क्रमविघाते धर्मनाशोऽतस्ततोऽस्य श्रैष्ठ्यमिति भाव, हेत्वन्तरमप्याह प्रत्यवाय इति, इहेत्यनुवर्तनीयमिह मोक्षधर्मे प्रत्यवायोऽकरणे दोषो न विद्यते नैवास्तीत्यर्थ, तथा च गीतायामपि भगवतोक्तं ।

'नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयादि'ति ॥

अतोऽनादरो मुमुक्षिर्विनेय इति भाव ॥ १ ॥

अस्मिन्नर्थे याज्ञवल्क्यवाक्यं प्रमाणयितुमाह।

तथा च याज्ञवल्क्यः।

तथाचेति। तथा च तथैव याज्ञवल्क्यो याज्ञवल्क्यनामा मुनिराहेति शेषः, केन वाक्येनेत्याशङ्क्य तद्वाक्यमुदाहरतीज्येति।

इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम्।
अयमेव परो धर्मो यद्योगेनात्मदर्शनम्॥ २॥

इ० बो० मु० पुराण० अष्टा० धर्मशास्त्रनिर्णय॥ ७॥

इज्येति। इज्याचारदमाहिंसादानस्वाध्यायकर्मणामिज्या यागक्रियाऽऽचारः स्वस्ववर्णाश्रमोचितधर्मानुष्ठानं दमो बाह्येन्द्रियाणां स्वाधीनताऽहिंसा सर्वभूतेषु दयालुता दानं सत्पात्रेषु विधिपूर्वकं द्रव्यादेः समर्पणं स्वाध्यायः स्वशाखोक्तव्रतपूर्वकं स्वशाखापाठः एतन्नामकानि यानि कर्माणि तेषां मध्ये परः श्रेष्ठो धर्मो विहितकर्मरूपोऽयमेव, अयं क इत्यत स्पष्टं दर्शयति यदिति, यद्विवेकिषु प्रत्यक्षं योगेन जीवात्मैक्यज्ञानेनात्मदर्शनमात्मनो ब्रह्माभिन्नप्रत्यगात्मनो दर्शनं दृश्यते ब्रह्माभिन्नः प्रत्यगात्माऽनेनेति दर्शनं साक्षात्कारो भवति सोऽयमित्यर्थः, अन्तःकरणमलनिवृत्तिद्वारा ज्ञानोत्पादको निष्कामधर्म एव श्रेष्ठ इति भावः॥ २॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थ० मुनीन्द्रदिनचर्यार्थप्रकाशे पुराणश्रवणनिर्णयार्थप्रकाशान्तर्गताष्टादशविद्यानिर्णयार्थप्रकाशे धर्मशास्त्रनिर्णयार्थप्रकाशः सप्तमः॥ ७॥

अथ श्रौतस्मार्तनिर्णय ।

एव धर्मशास्त्रनिर्णयमभिधायेदानी तत्प्रसगाच्छ्रौतस्मार्त्त-निर्णयं वक्तुं श्रौतस्मार्तनिर्णयाख्य द्विश्लोक प्रकरणमभिदधान आह ।

अथ श्रौतस्मार्त्तनिर्णयः ।

अथेति । अथ धर्मशास्त्रनिर्णयानन्तर प्रसङ्गप्राप्तो धर्मशास्त्रनिर्णयप्रसङ्गेन प्राप्तो वर्णनायागत श्रौतस्मार्त्तनिर्णय श्रौताख्यकर्मण-स्मार्त्ताख्यकर्मणश्च निर्णयो विचारः क्रियत इति शेष, त-मवाह ।

श्रवण श्रौतमित्युक्तं स्मरणं स्मार्त्तमुच्यते ।
श्रवणं मनन चेति श्रौतस्मार्त्तविनिर्णयः ॥ १ ॥

श्रवणमिति । श्रवणं शारीरकप्रथमाध्यायोक्तश्रुतिसमन्वयेन सर्व-वाक्याना तात्पर्यभूतब्रह्मचिन्तनपूर्वक वेदान्तश्रवणमेव श्रौतना-मकं कर्मसेवमुक्त कथित मुनिभिरिति शेष, स्मरणं श्रुत्युक्ता-र्थानुचिन्तनमेव स्मार्त कर्मसेवमुच्यते कथ्यते विवेकिभिरिति शे-ष, इत्यतो हेतो श्रवण मनन च सर्ववेदान्तवाक्यानामादिमध्या-वसानेषु अखण्डैकरसे तात्पर्यावधारणलक्षण श्रवण मनन च श्रुतार्थस्य युक्त्या सम्भावितत्वानुसन्धानलक्षणं शारीरकद्वि-तीयाध्यायोक्त मननमपि कर्त्तव्यमित्ययं श्रौतस्मार्त्तविनिर्णयः श्रौतस्मार्ताख्यकर्मणो विनिर्णयो विवेकः सिद्धान्त इत्यर्थः, ज्ञेय इति शेषः ॥ १ ॥

प्रकारान्तरेणाप्याह ।

श्रुत श्रीगुरुवक्त्रेभ्यः स्मृतमेव न विस्मृतम् ।

श्रौतस्मार्तमिदं येषां श्रौतस्मार्त्तविदो हि ते ॥ २ ॥

श्रुतमिति । श्रीगुरुवक्त्रेभ्यो वैराग्यादिसम्पत्तिमन्तो ये गुरवो महावाक्योपदेष्टारस्तेषां वक्त्रेभ्यो मुखेभ्यः श्रुतं श्रवणेन विषयीकृतं तदेव श्रौतं ज्ञेयं, तत्स्मृतमेव सर्वदानुसन्धत्तमेव न विस्मृतं विस्मरणविषयं नैव कृतं तदेव स्मार्त्तं ज्ञेयम्, इदं श्रवणस्मरणरूपं श्रौतस्मार्त्तं श्रौतस्मार्त्ताख्यं कर्म येषां विवेकिनामस्ति हि ते विवेकिन एव प्रसिद्धाः श्रौतस्मार्त्तविदः श्रौतस्मार्त्ताख्यकर्मवेत्तारो भवन्ति नान्ये ॥ २ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ मुनीन्द्रदिनचर्यार्थप्रकाशे पुराणश्रवणनिर्णयप्रकाशेऽष्टादशविद्यास्थाननिर्णयार्थप्रकाशान्तर्गतो श्रौतस्मार्त्तनिर्णयार्थप्रकाशोऽष्टम ॥ ८ ॥

अथ ङ्गानि ।

एवं श्रौतस्मार्त्तनिर्णयमभिधायेदानीमङ्गानि निर्णेतुमङ्गनिर्णयाख्यं प्रकरणमभिदधान आह ।

अथाङ्गानि ।

अथेति । अथ श्रौतस्मार्त्तनिर्णयानन्तरमङ्गानि निर्णीयन्ते शिक्षादीन्यङ्गानि विचार्यन्त इत्यर्थः, तत्रादावङ्गानि संगृह्य दर्शयति ।

शिक्षा कल्पो व्याकरणं निरुक्तं छन्द एव च
ज्योतिषं च षडङ्गानि तेषामेव निर्णयः ॥ १ ॥

शिक्षेति । शिक्षा शिक्षानामकं पाणिनिकृतमेकं, तथा कल्पः कल्पनामकं श्रुत्यर्थानां कर्मोपासनादिरूपाणां प्रतिपादकं द्वितीयं, तथा व्याकरणं शब्दशास्त्रं तृतीयं, तथा निरुक्तं

निरुक्तनामकं यास्करचितं वेदनिघण्ट्वर्थसंग्राहक चतुर्थ, तथा च्छन्द एव च च्छन्दोनामकं वैदिकलौकिकच्छन्दोलक्षणज्ञापक शास्त्र पिङ्गलनागनिर्मित पञ्चमं, तथा ज्योतिष च ज्योतिषनामक यज्ञार्थकालप्रतिपादक पञ्चसम्वत्सरमयमित्यादिवाक्यकदम्बरूप षष्ठम्, एतानि षट् षट्सङ्ख्यानि अङ्गानि वेदस्यावयवरूपाणि तेषामङ्गानामेषो वक्ष्यमाणो विनिर्णयो विचारो ज्ञेयः ॥ १ ॥

अथशिक्षानिर्णय. ।

तत्रादौ शिक्षानिर्णयाख्यमेकश्लोकं शिक्षां निर्णेतु प्रकरणमारभमाण आह ।

अथ शिक्षानिर्णयः ।

अथेति। अथाङ्गनिरूपणप्रतिज्ञानानन्तर शिक्षानिर्णयः शिक्षायाः शिक्षातात्पर्यस्य निर्णयो विचारः क्रियत इति शेषः, तमेवाह ।

शुद्धो विदेहभावेन शिक्षितः शिक्षया यया ।
सा शिक्षा यदि न प्राप्ता शिक्षया शिक्षित किमु ॥२॥

शुद्धेति । यया विवेकिप्रसिद्धया शिक्षया महावाक्योपदेशरूपया शिक्षित उपदिष्टः सन्विदेहभावेन देहासन्तासत्त्वज्ञानेन शुद्धो देहाद्यस्पृष्टो भवति प्राणी सा शिक्षा स उपदेशो यदि यर्हि न प्राप्ता न लब्धा गुरुतस्तर्हि तदा शिक्षया पाणिन्युक्तया शिक्षया यच्छिक्षित वर्णस्वरस्थानादि ज्ञातमपि तत्किमु अतितुच्छ तदिति भावः ॥ २ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ मुनीन्द्रदिनचर्यार्थप्रकाशे पुराणनिर्णयार्थप्रकाशेऽष्टादशविद्यास्थाननिर्णयार्थप्रकाशान्तर्गत शिक्षा निर्णयार्थप्रकाशो नवम ॥ ९ ॥

एवं शिक्षानिर्णयं निरूप्येदानीं कल्पं निर्णेतुं कल्पनिर्णयाख्यं द्विश्लोकं प्रकरणमारभमाण आह ।

अथ कल्पसूत्रनिर्णयः ।

अथेति । अथ शिक्षानिर्णयानन्तरं कल्पसूत्रनिर्णयः कल्पसूत्राणां निर्णयो विचारः क्रियत इति शेषः, तत्र तावत्सर्वकल्पनाधारभूतं निःशेषविकल्परहितं न ज्ञातं चेत्तत्र कल्पितविषयनिर्णायककल्पसूत्राणां निरर्थकतामाह ।

कल्पानां प्रथमः कल्पो निर्विकल्पमिदं न चेत् ।

विकल्पसंकल्पमयैः कल्पसूत्रैः किमर्जितम् ॥ १ ॥

कल्पानामिति । कल्पानां कल्प्यन्ते निरूप्यन्ते कर्माण्युपासनानि च यैस्ते कल्पास्तेषां कल्पाभिधसूत्राणां कल्पनानां चाधारत्वेन कल्पितत्वात्प्रथमः पूर्वः कारणभूत इत्यर्थः, कल्प आत्मा निर्विकल्पं निर्गता विकल्पा विपरीतनामजात्यादिकल्पना यतः कर्मणि यथा भवन्ति तथेदमिति साक्षान्न वेत्ति चेन्न जानाति यदि, यद्वा सर्वकल्पनाधारभूत आत्मैव निर्विकल्पं ब्रह्म तदिदमिति साक्षान्न कृतं चेद्यदीत्यर्थः ।

सर्वकल्पनाधारभूतं ब्रह्मैव निर्विकल्पपदेनोक्तोऽहमादिकल्पनाधारभूतः प्रत्यगात्मा प्रथमकल्पपदाभ्यामुक्तस्तयोः कल्पितं सर्वं जगदिदमिति पदेनोक्तं तत्र 'नेह नानास्ति किञ्चनातोऽन्यदार्त्तमि'त्यादिश्रुतिभ्यो द्वैतजाते बाधितदृष्टिं कृत्वा 'तत्त्वमसि, प्रज्ञानं ब्रह्माहंब्रह्मास्मि, अयमात्मा ब्रह्मे'त्यादिश्रुतिभ्यस्तत्त्वमादिपदार्थभूतयोः शोधितयोः शुद्धजीवेश्वरयोः प्रत्यक्षपरोक्षत्वादिविरुद्धांशत्यागेन चिन्मात्रस्वरूपत्वेनैक्यमनुभूय यावत्प्रारब्धमाभासमात्रत्वेन दृश्यमानं जगज्जातं '[illegible] खल्विदं ब्रह्मे'ति-

श्रुतिदृष्ट्या सर्वत्र ब्रह्मदृष्टिर्न कृता चेद्यदीत्यर्थः, तर्हि तदा विकल्पसङ्कल्पमयैर्विकल्पसङ्कल्पप्रचुरैः कल्पसूत्रैः कल्पाभिधै सूत्रैः किमर्जित किं सम्पादित न किमपीत्यर्थः, तैः प्रतिपादितस्यावस्तुत्वादिति भाव. ॥ १ ॥

ननु कल्पविचारो विहितस्तत्किं निन्द्यते भवतेत्याशङ्क्य मुमुक्षूणा ब्रह्मभावकल्पस्यैव विहितत्वात्तदभावे निरर्थकत्वं कल्पाभ्यासस्येत्याशयेनाह ।

कल्पको येन कल्पेन ब्रह्मभूयाय कल्पते ।

स कल्पो नैव क्लृप्तश्चेत्कल्पसूत्र निरर्थकम् ॥ २ ॥

कल्पक इति । कल्पकः कल्पनाकुशलो येन कल्पेनाहब्रह्मास्मीति अह ब्रह्मशब्दार्थयोः शुद्धजीवब्रह्मणोर्भागलक्षणाया प्रत्यक्त्वपरोक्षत्वरूपविरुद्धांशत्यागेन चिन्मात्रैक्यलक्षणलक्षितसाक्षात्करणरूपकल्पेन कल्पनारूपेण पृथक्कस्य कल्पितत्वादपृथक्कस्यापि कल्पितत्वमिति भावः, ब्रह्मभूयाय ब्रह्मभावमङ्गीकर्त्तुं कल्पते योग्यो भवति स उक्तलक्षण कल्प कल्प्यते ब्रह्मभावोऽनेनेति कल्पोऽहब्रह्मास्मीति साक्षात्काररूपः क्लृप्तः प्राप्तो नैव चेन्न विद्यते यदि तर्हि कल्पसूत्र कल्पसूत्रनामक वाक्यजात निरर्थक व्यर्थ ज्ञेय कल्पसूत्रप्रतिपादितेर्थे मुमुक्षुप्रयोजनाभावात्तत्र तैर्नाभिनिवेश कर्त्तव्य इति भावः ॥२॥

इति श्रीनरहरिशिष्यदिवाकरविरचिताया बोधसारार्थदीप्तौ मुनीन्द्रदिनचर्यार्थप्रकाशे पुराणश्रवणनिर्णयार्थप्रकाशेऽष्टादशविद्यास्थाननिर्णयार्थप्रकाशान्तर्गत' कल्पसूत्रनिर्णयार्थप्रकाशो दशम ॥ १० ॥

अथ व्याकरणनिर्णय ।

एवं कल्पनिर्णयमभिधायेदानी व्याकरण निर्णेतु व्याकरणनिर्णयाख्य त्रिश्लोक प्रकरणमभिदधान आह ।

अथ व्याकरणनिर्णयः ।

अथेति। अथ कल्पनिर्णयानन्तर व्याकरणनिर्णयो व्याकरणस्य व्याकरणशास्त्रस्य निर्णयस्तात्पर्यविचारः क्रियत इति शेषः, तत्र तावन्महावाक्यार्थज्ञानाय महावाक्यस्थपदानामर्थस्य च व्युत्पत्तये व्याकरणाभ्यासोऽभिहितस्तदभावे च स व्यर्थ इत्याह।

पदव्युत्पत्तिरन्वेष्या महावाक्यार्थबुद्धये ।
स एव यदि न ज्ञातस्तर्हि व्याकरणेन किम् ॥१॥

पदव्युत्परिति। महावाक्यार्थबुद्धये महान्ति श्रेष्ठानि यानि वाक्यानि तत्त्वमसीत्यादीनि तेषामर्थस्तात्पर्य तस्य बुद्धिर्बोध स्तस्मै तदर्थमित्यर्थः, पदव्युत्पत्तिः पदाना तत्त्वमसीत्यादीनां व्युत्पत्तिर्ज्ञानमन्वेष्याऽन्वेष्टव्या पदबोधोपयोगितयैव केवल व्याकरणमध्येतव्यमिति भावः, स एव महावाक्यार्थ एव यदि यर्हि नज्ञातस्तदा व्याकरणे न व्याकरणशास्त्रेण तदध्ययनेनेत्यर्थः । किं कृतमिति शेषः, न किमपि कृतमित्यर्थः, महावाक्यार्थज्ञानाभावे व्याकरणाध्ययनप्रयासो व्यर्थ एवेति भावः ॥ १ ॥

व्याकरणपदनिरुक्त्यापि तमेवार्थं द्रढयति ।

येनेदं व्याकृत विश्व तदेव व्याकृत न चेत् ।
बृहन्नो वेत्ति यत्तर्हि तद्धि व्याकरणेन किम् ॥ २ ॥

येनेति । येन ब्रह्मणेद विश्व ज्ञानविषयभूत प्रत्यक्ष जगद्व्याकृत विविधाकारवत्कृत तदेव तद्ब्रह्मैव व्याकृत जगद्विपरीताकारेणाऽखण्डसच्चिदानन्दरूप साक्षाज्ज्ञात न चेन्न यदि तर्हि

उक्तमेवार्थं स्पष्टमाह बृहदिति, बृहद्ब्रह्म यद्यदा नो वेत्ति न जानाति तर्हि तदा व्याकरणेन व्याकरणशास्त्राभ्यासेन किं कृतमिति शेषः, न किमपि कृतमित्यर्थः। यद्वा किं फलं न किमपीत्यर्थः, अतः पदव्युत्पत्तिपर्यन्तमेव व्याकरणाभ्यासो विहितस्ततो वेदान्तश्रवणादिप्रयास एव कार्यो मुमुक्षुभिरिति भावः॥२॥

ननु महावाक्यार्थोपयोगितया महावाक्यपदव्युत्पत्तिस्तत्प्रयोजनतयैव व्याकरणोपयोगश्चेत्तत्रान्येपि शब्दाः कुतः साधिता इत्याशङ्क्य प्रकृत्यर्थप्रत्ययार्थज्ञानद्वारा तेषां पदार्थानां स्वरूपेण हेयत्वज्ञानेन तास्त्यक्त्वा महावाक्यश्रवणादिषु प्रवृत्त्यर्थमित्याशयेनाह ।

यतस्तु परिनिष्पन्नैः शब्दैः शास्त्रान्मुहुर्मुहुः ।
हेयादेयौ न विज्ञातौ तर्हि व्याकरणेन किं ॥ ३ ॥

इति श्रीन० बो० मु० पु० अष्टा० व्याकरणनिर्णय ॥ १ ॥

यत इति । यस्मादेव व्याकरणाच्छास्त्रात्परिनिष्पन्नैरुत्पन्नैः शब्दैर्नामभिर्मुहुर्मुहुर्वारं वारं हेयोपादेयावनात्मत्वेन हेयस्त्याज्यो मायातत्कार्यरूपः प्रपञ्च आदेयश्चात्माऽऽत्माकूटस्थासङ्ग इत्यादिशब्दानामर्थभूतस्तौ न विज्ञातौ न बुद्धौ यदि तर्हि तदा व्याकरणेन व्याकरणशास्त्राभ्यासेन किं किं फलं भवति न किमपीत्यर्थः, अतो व्याकरणस्यानन्तशब्दसाधकत्वेपि महावाक्यपदसाधनपरतैवेति मुमुक्षुभिस्तदधीत्य महावाक्यार्थनिष्ठैव विधेया न व्याकरणाध्ययनाभिनिवेशः कार्य इति भावः ॥ ३ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थ० मुनीन्द्रदिनचर्यार्थप्रकाशे पुराणश्रवणनिर्णयार्थप्रकाशेऽष्टादशविद्यास्थाननिर्णयार्थप्रकाशान्तर्गतो व्याकरणनिर्णयार्थप्रकाश एकादश ॥ ११ ॥

एव व्याकरणनिर्णयमभिधायेदानीं निरुक्तं निर्णेतुं निरुक्त-निर्णयाख्यमेकश्लोक प्रकरणमभिधान आह ।

अथ निरुक्तनिर्णयः ।

अथेति । अथ व्याकरणनिर्णयानन्तरं निरुक्तनिर्णयो निरुक्तस्य यास्कप्रणीतस्य 'समाम्नायः समाम्नात' इत्यादिवाक्य-कदम्बरूपस्य निरुक्ताख्यग्रन्थस्य निर्णयो मुमुक्षुग्राह्यो विचारः क्रियत इति शेषः, तमेव निरुक्तशब्दनिरुक्त्याह ।

निरुक्तं चिदवस्थानं निरुक्त बोधनं चितः ।
तन्निरुक्त न चेद्वेद निरुक्तस्य किमुक्तिभि. ॥ १ ॥

इति श्री०बो०मु०पु०अ०निरुक्तनिर्णय ॥ १२ ॥

निरुक्तमिति । चिदवस्थान चितश्चिन्मात्ररूपस्यात्मनोऽवस्थान स्थितिर्निरुक्त निर्गत निवृत्तमुक्त भाषण यस्मात्तन्निरुक्त वचनाविषयमित्यर्थः, अस्तीति शेषः, तथा चितश्चिन्मात्ररूपस्यात्मनो बोधन बोध्यतेऽनेनेति बोधनमुपदेशस्तन्निरुक्तं वागविषय 'यतो वाचो निवर्त्तते अप्राप्य मनसा सह, यद्वाचानभ्युदितमवचो नैव प्रोवाच स ह तूष्णीं बभूव, इत्यादिश्रुते, तदुक्तविध निरुक्त चिदवस्थान चिदवबोधनरूप न वेद न वेत्ति चेद्यदि तर्हि निरुक्तस्य यास्ककृतनिरुक्ताभिधग्रन्थस्योक्तिभिर्भाषणैः किं किं फल मुमुक्षूणां न किमपीत्यर्थ, अतोऽन्यविषयकनिरुक्तादरं परित्यज्यात्मज्ञानविषयकनिरुक्तवाक्य-श्रवणाद्येवावर्तनीयमिति भावः ॥ १ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचिताया बोधसारार्थदीपौ मुनीन्द्रदिनचर्यार्थप्रकाशे पुराणनिर्णयार्थप्रकाशेऽष्टादशविद्यास्थाननिर्णयार्थप्रकाशान्तर्गतो निरुक्तनिर्णयार्थप्रकाशो द्वादश ॥ १२ ॥

अथ च्छन्दोनिर्णय ।

एवं निरुक्तनिर्णयं कृत्वा च्छन्दो निर्णयं कर्त्तुं छन्दोनिर्णयाख्यमेकश्लोकं प्रकरणमभिदधान आह ।

अथ च्छन्दोनिर्णयः ।

अथेति । अथ निरुक्तनिर्णयानन्तरं छन्दोनिर्णयश्छन्दःशब्दवाच्यस्याऽर्थस्य निर्णयो विचारः क्रियत इति शेषः, तमेवाह ।

तच्छन्दो यदि न ज्ञातं स्वछन्दो येन खेलति ।
यरस्तजभ्नमोपेतैश्छन्दोभिः किं प्रयोजनम् ॥१॥

इ० बोध० मु० पु० अ० छन्दोनिर्णय ॥ १३ ॥

तदिति । तज्जीवन्मुक्तेषु प्रसिद्धं छन्दः स्वाभाविकव्यवहाररूपं सहजवर्त्तनं न ज्ञातं न विदितं यदि यर्हि तत्कि येन स्वच्छन्दचारित्वेन स्वच्छन्दः स्वाधीनः सन् खेलति क्रीडति तदिति योज्यं, तर्हि यरस्तजभ्नमोपेतैः 'लघ्वादिसमन्वितं यकाराख्यमि'ति पिङ्गलसूत्रोक्तलक्षणलक्षितो यो यगणः, तथा रो रगणो 'लघुमध्यमं तु रेफमि'त्युक्तलक्षणः, सः सगणः 'सकारमन्ते गुरुनिबद्धमि'त्युक्तलक्षणः, तस्तगणो 'लघ्वन्त्यं हि तकारमित्युक्तलक्षणः, जो जगणो 'जकारमुभयोर्लघु विजानीयादि'त्युक्तलक्षणः, भो भगणः 'आदिगुरु च भकारमि'त्युक्तलक्षणः, नो नगणो 'नकारमिह पैङ्गले त्रिलघुमित्युक्तलक्षणः, मो मगणः 'त्रिगुरु विद्धि मकारमि'त्युक्तलक्षणः, एतैरुक्तलक्षणैर्गणैरुपेतानि युक्तानि तैश्छन्दोभिरार्यादिवृत्तादिविशेषोपलक्षितैश्छदःशब्दवाच्यैः पद्यविचारैरित्यर्थः, किं प्रयोजनं किं फलं मुमुक्षूणां न किमपीत्यर्थः, छन्दःशास्त्रादरं परित्यज्य मुमुक्षुभिर्वेदान्तश्रवणादिष्वेवादरो विधेय इति भावः ॥१॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ

मुनी द्रदिनचर्यार्थप्रकाशे पुराणश्रवणनिर्णयार्थप्रकाशेऽष्टादश-
विद्यास्थाननिर्णयार्थप्रकाशान्तर्गतश्छन्दोनिर्णयार्थप्र-
काशस्त्रयोदशः ॥ १३ ॥

अथ ज्यौतिषनिर्णयः ।

एवं छन्दोनिर्णयमभिधायेदानीं ज्यौतिषं निर्णेतुं ज्यौतिषनिर्णयाख्यमेकश्लोकं प्रकरणमभिदधान आह ।

अथ ज्यौतिषनिर्णयः ।

अथेति । अथ च्छन्दोनिर्णयानन्तरं ज्यौतिषनिर्णयो ज्यौतिषस्य ज्यौतिषशास्त्रस्य निर्णयो मुमुक्षुविहितो विचारः क्रियत इति शेषः, तमेवाह ।

ज्योतिषा येन सूर्यादि ज्योतिर्भाति न वेत्ति तत् ।
यदि येन तदा तेन ज्योतिर्ग्रन्थेन किं कृतम् ॥ १ ॥

इति श्रीनरहरिकृतौ बो०मु० पु० अ० ज्योतिःशास्त्रनिर्णयः ।

ज्योतिषेति । येन विदुषा प्रत्यक्षभूतेन ज्योतिषा स्वयंप्रकाशरूपेण चिद्रूपेण 'तदेव ज्योतिषां ज्योतिः, आत्मैवास्य ज्योतिर्भवती इत्यादिश्रुतिभ्यः', सूर्यादि सूर्य आदिरादिर्यस्याग्निचन्द्रवाग्रूपस्य ज्योतिषस्तत्तथोक्तं ज्योतिर्व्यवहारप्रकाशसाधनं सूर्यादिरूपं भाति प्रकाशते सूर्यादीनां ज्योतिष्ट्वे श्रुतयस्तावत् 'सूर्य एवास्य ज्योतिर्भवति, चन्द्रमा एवास्य ज्योतिर्भवति अग्निरेवास्य ज्योतिर्भवति वागेवास्य ज्योतिर्भवती'त्यादयः, तदात्मरूपं ज्योतिर्येन ज्यौतिषशास्त्रेण न वेत्ति न जानाति यदि यर्हि तदा तर्हि तेन लोकप्रसिद्धज्योतिषा सूर्यादेर्निरूपणप्रधानेन ज्योतिर्ग्रन्थेन ज्यौतिषशास्त्रेण किं कृतं किं

सम्पादित न किमपीत्यर्थः, तस्मादस्य सर्वार्थस्यानात्मत्वा-
दिति भाव', सूर्यादिज्योतिष आत्मज्योतिःप्रकाश्यत्वे श्रुत-
यस्तावद् 'येन सूर्यस्तपति तेजसेद्ध', तस्य भासा सर्वमिदं वि-
भाति, आत्मनैव ज्योतिषास्ते' इत्याद्याः ॥ १ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ मु-
नीन्द्रदिनचर्यार्थप्रकाशे पुराणश्रवणनिर्णयार्थप्रकाशेऽष्टाद
शविद्यास्थाननिर्णयार्थप्रकाशान्तर्गतो ज्योतिषनिर्णा-
यार्थप्रकाशश्चतुर्दश ॥ १४ ॥

अथ वेदनिर्णय ।

एवमङ्गानि निर्णीयाङ्गिनो वेदान्निर्णेतुमाह ।

अथ वेदाः ।

अथेति । अथाङ्गनिर्णयानन्तर वेदा ऋगाद्याश्चत्वारो
वेदा निर्णीयन्त इति शेष', तेष्वादावृग्वेद निर्णेतुमृग्वेदनिर्ण
याख्यमेकश्लोक प्रकरणमारभमाण आह ।

तत्रादावृग्वेदनिर्णयः ।

तत्रेति । तत्र वेदनिर्णय आदौ प्रथममृग्वेदनिर्णय ऋगु-
पलक्षितमन्त्रसमूहस्य वेदस्य ज्ञानसाधनभूतस्य निर्णयो मुमुक्षू-
पयोगी विचारः क्रियत इति शेषः, तमेवाह ।

यः परानन्ददः स्वात्मा त त्वा वय यजामहे ।
इत्याहुतो न विश्वात्म ऋचा हौत्रिण कि तदा ॥ १ ॥

इति श्रीन० बो० मु० पु० अ० ऋग्वेदनिर्णय ॥ १५ ॥

य इति । यो विवेकिषु प्रसिद्धः परानन्ददः परो निर-
तिशयो य आनन्दः सुख त ददाति यच्छति स तथोक्तः 'एष

शिवानन्दयाती’तिश्रुतेः, स्वात्मा स्वरूपभूत आत्माऽस्तीति तमुक्तलक्षण त्वा त्वामात्मरूप यजामह इदममास्पदसर्वविषयाहुत्या पूजयाम इत्येवं विश्वात्मा विश्वस्य जगत आत्मा स्वरूपभूतो न आहुतः सर्वजगदाहुत्या न तर्पितो यदि यर्हि तदा तर्हि ऋचा ऋगुपलक्षितेन ‘इत्थ भूतलक्षणे’ इति तृतीया, हौत्रेण हौत्राख्यकर्मणा कि किं फल मुमुक्षूणां न किमपीत्यर्थः, सर्वर्ग्वेदमन्त्राणामात्मज्ञानमेव फलमतोऽन्यकर्मप्रतिपादकमन्त्राननादृत्यात्मज्ञानप्रतिपादकमन्त्रसमूह एवादरो विधेय इति भावः॥१॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थ० मुनीन्द्रदिनचर्यार्थप्रकाशे पुराणश्रवणनिर्णयार्थप्रकाशेऽष्टादशविद्यास्थाननिर्णयार्थप्रकाशान्तर्गत ऋग्वेदनिर्णयार्थप्रकाश पञ्चदश ॥ १५ ॥

अथ यजुर्वेदनिर्णय ।

एवमृग्वेदं निर्णीयेदानी यजुर्वेद निर्णतुं यजुर्वेदनिर्णयाख्यमेकश्लोक प्रकरणमभिदधान आह ।

अथ यजुर्वेदनिर्णयः ।

अथेति । अथर्ग्वेदनिर्णयानन्तर यजुर्वेदनिर्णयो यजुर्वेदस्य निर्णयो मुमुक्षूणामुपयोगी विचारः क्रियत इति शेषः, तमेवाह ।

लोहिता धवला कृष्णा प्रजाहेतुरजा यदि ।
नोपालब्धा ब्रह्मसत्रे यजुषाध्वर्यवेण किम् ॥ १ ॥

इति श्रीन०बोध०मु०पु०अ०यजुर्वेदनिर्णय ॥ १६ ॥

लोहितेति । लोहिता रक्ता रजोगुणवतीत्यर्थः, धवला शुक्ला सत्त्वगुणवतीत्यर्थः, कृष्णा श्यामा तमोगुणवतीत्यर्थः, एतैर्गुणैर्जगज्जननप्रकाशावरणस्वभावेति भावः, प्रजाहेतुः प्रजा-

यन्त उत्पद्यन्त इति प्रजा महदाद्याः प्रकृतिविकृतिरूपास्तासां हेतुः कारणभूता जगज्जनयित्रीत्यर्थः, अजा मायात्वादेवानुत्पन्ना गुणसाम्यावस्थारूपा शक्तिर्ब्रह्मसत्रे ब्रह्म देशकालवस्तुकृतपरिच्छेदशून्यमात्मवस्तु व्यापक तदेव सत्रमिव सत्र सर्वसत्रफफलरूपत्वाद् ब्रह्मरूपं सदात्मवस्तु त्रायते रक्ष्यतेऽस्मिन्निति सत्र 'ब्रह्मार्पण ब्रह्म हवि'रित्यादिनोक्तलक्षण तस्मिन्निति वा, नोपालब्धा लौकिकयज्ञे प्रसिद्धाऽजेव न हिंसिता 'सर्व खल्विति, नेह नानास्ती'त्यादिश्रुतिदृष्ट्या न बाधितेत्यर्थः, यदि तर्हि तदा यजुषा यजुर्मन्त्रैर्निर्वाहितेनाध्वर्यवेणाध्वर्युकृतेन कर्मणा किं किं फल न किमपीत्यर्थ ॥ १ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ मुनीन्द्रदिनचर्यार्थप्रकाशे पुराणनिर्णयार्थप्रकाशेऽष्टादशविद्यास्थाननिर्णयार्थप्रकाशान्तर्गतो यजुर्वेदनिर्णयार्थप्रकाश षोडश ॥ १६ ॥

अथ सामवेदनिर्णय ।

एवं यजुर्वेद निर्णीयेदानी सामवेदं निर्णेतुं सामवेदनिर्णयाख्यमेकश्लोक प्रकरणमभिदधान आह ।

अथ सामवेदनिर्णयः ।

अथेति । अथ यजुर्वेदनिर्णयानन्तर सामवेदनिर्णयः सामवेदस्य गीतिप्रधानस्य वेदस्य निर्णयो विचारो मुमुक्षुग्राह्यः क्रियत इति शेषः, तमेवाह ।

छान्दोग्येनोपनिषदा प्रेमगद्गदया गिरा ।
साम्ना गीतं न चेद्ब्रह्म सामोद्गात्रेण किं तदा ॥१॥

इति श्रीन० बो० मु० पु० अ० सामवेदनिर्णय ॥ १ ॥

छान्दोग्येनेति । च्छान्दोग्येन च्छान्दोग्यनाम्नोपनिषदोप निषण्ण समीपे स्थित विचारद्वारा श्रेयो मुक्तिरूप यस्या सोपनिषत्तया, आविष्टलिङ्गत्वेन विशेषणविशेष्यभावस्तदुक्तं ।

'लिङ्गसङ्ख्याविभेदेपि विशेषणविशेष्यता ।

विभक्तिः पुनरेकैव विशेषणविशेष्ययोः ॥

आविष्टलिङ्ग तत्प्रोक्तमि'ति । प्रेमगद्गदया गिरा प्रेम्णा निरतिशयस्नेहेन कृत्वा गद्गदयाऽवरुद्धकण्ठनिःसृतया गिरा वाण्या ब्रह्म देशकालवस्तुकृतपरिच्छेदहीनमात्मवस्तु गीत गानविषयीकृत न चेन्न यदि तदा तर्हि सामौद्गात्रेण सामप्रोक्तेनौद्गात्राख्यकर्मणा किं कि फल भवेन्न किमपीत्यर्थ', अतोऽनात्मविषयक सर्व साम परित्यज्यात्मविषयकमेव साम श्रोतु म तुं निदिध्यासितु गातुमादरो विधेयोमुमुक्षुभिरिति भावः॥१॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ मुनीन्द्रदिनचर्यार्थप्रकाशे पुराणनिर्णयार्थप्रकाशऽष्टादशविद्यास्थाननिर्णयाथप्रकाशान्तर्गत सामवेदनिर्णयार्थप्रकाश सप्तदश ॥ १७ ॥

अथाथर्वणवेदनिर्णय ।

एव सामवेदनिर्णयमभिधायेदानीमथर्वणवेद निर्णेतुमथर्वणवेदनिर्णयाख्यमेकश्लोक प्रकरणमारभमाण आह ।

अथाथर्वणवेदनिर्णय' ।

अथेति । अथ सामवेदनिर्णयानन्तरमथर्वणवेदनिर्णयोऽथर्वणवेदस्याथर्वणनाम्नो वेदस्य निर्णयः मुमुक्षूपयोगी विचारः क्रियत इति शेष', तमेवाह ।

आथर्वणी ब्रह्मविद्या पिप्पलादमुखाच्च्युता ।

चमत्कृता न हृदये किं फलं तर्ह्यथर्वभिः ॥ १॥

इति श्रीनर० बो० मु० पु० अ० अथर्वणवेदनिर्णय ॥ १२ ॥

आथर्वणीति । आथर्वण्यथर्वणवेदोद्भवा ब्रह्मविद्या पिप्पलादमुखाच्च्युता पिप्पलफलानि अत्ति भक्षयतीति पिप्पलाद एतेन वैराग्यातिशयो ध्वनितः, तस्य मुखाद्वदनाच्च्युता निःसृताऽनेन मुमुक्षुभिरत्यादरणीयत्व ध्वनित, ब्रह्मविद्या ब्रह्मणो देशकालवस्तुकृतपरिच्छेदरहितस्यात्मवस्तुनो विद्या ज्ञापिका ब्रह्मज्ञानप्रतिपादयित्रीत्यर्थः, हृदयेन्त करणे चमत्कृताऽऽविर्भूता न चेन्न यदि तर्हि तदाऽथर्वभिरन्यैरथर्वणप्रयोगै. कि फल किं प्रयोजन न किमपीत्यर्थ, ब्रह्मज्ञानेतरविषयप्रतिपादकमथर्वणवाक्यसमूहमनादृत्य ब्रह्मज्ञानविषयकाथर्वणवाक्यसमूहश्रवणादिष्वेव प्रवृत्तिर्मुमुक्षुभिः कर्त्तव्येति भाव ॥ १ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचिताया बोधसारार्थदीपौ मुनीन्द्रदिनचर्यार्थप्रकाशे पुराणश्रवणनिर्णयार्थप्रकाशेऽष्टादशविद्यास्थाननिर्णयार्थप्रकाशान्तर्गतोऽथर्वणवेदनिर्णयार्थप्रकाशोऽष्टादश ॥ १८ ॥

अथायुर्वेदनिर्णय ।

एव वेदनिर्णयमभिधायेदानीमायुर्वेद निर्णेतुमायुर्वेदनिर्णयाख्यमेकश्लोक प्रकरण वक्तुकाम आह ।

अथायुर्वेदनिर्णयः ।

अथेति । अथाथर्ववेदनिर्णयानन्तरमायुर्वेदनिर्णय आयुषो वेदस्य ज्ञानस्य ज्ञानसाधनस्य चिकित्साशास्त्रस्येत्यर्थ', निर्णयो मुमुक्षूपयोगी सिद्धान्तः क्रियत इति शेषः, तमेवाह ।

ज्ञानामृतं न चेत्पीतममृतत्वं न साधितम् ।
मृत्युरेव पुन. प्राप्त आयुर्वेदो निरर्थकः ॥ १ ॥

इति श्रीन० बो० पु० अ० आयुर्वेदनिर्णय ॥ १९ ॥

ज्ञानामृतमिति । ज्ञानामृत ज्ञायते ब्रह्माऽनेनेति ज्ञान महावाक्यजन्य साक्षात्काररूपमह ब्राह्मास्मीत्याकारं तदेवामृत पीयूष जरामरणादेर्निवर्त्तकत्वात् तत्पीतं प्राशितं न नास्ति चेद्यदि तर्हि तदाऽमृतत्वं न मृत ब्रह्म तस्य भावस्तत्त्व न साधित न सपादित स्यात्तदा तर्हि पुनर्भूयो मृत्युरेव मरणमेव प्राप्तो लब्धस्तदाऽऽयुर्वेद आयुषः साधनभूतं यज्ज्ञान तत्प्रतिपादको ग्र थो निरर्थको व्यर्थ इत्यर्थः, अत आयुर्वेदादर परित्यज्य मोक्षसाधनभूतज्ञानसाधनवेदान्तश्रवणादिष्वादरो मुमुक्षुभि· कर्त्तव्य इति भाव ॥ १ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ मुनीन्द्रदिनचर्यार्थप्रकाशे पुराणनिर्णयार्थप्रकाशे ऽष्टादशविद्यास्थाननिर्णयार्थप्रकशान्तर्गत आयुर्वेदनिर्णयार्थप्रकाश एकोनविंश ॥ १९ ॥

अथ धनुर्वेदनिर्णय ।

एवमायुर्वेद निर्णीयेदानी धनुर्वेद निर्णेतु धनुर्वेदनिर्णयाख्यमेकश्लोकं प्रकरणमारभमाण आह ।

अथ धनुर्वेदनिर्णय· ।

अथेति । अथायुर्वेदनिर्णयानन्तरं धनुर्वेदनिर्णयो धनुषो धनुरुपलक्षितस्य शस्त्रास्त्रसमूहस्य वेदः प्रेरणाकर्षणादिज्ञानप्रतिपादक शास्त्र तस्य निर्णयो मुमुक्षुसंमतः सिद्धान्तः क्रियत इति शेषः, तमेवाह ।

प्रणवेनैव धनुषा प्रबोधेन शरेण च ।
लक्ष्यं ब्रह्म न चेद्विद्ध धनुर्वेदो निरर्थकः ॥ १ ॥

इति न० बो० मु० पु० अ० धनुर्वेदनिर्णय ॥ २० ॥

प्रणवेनेति । प्रणवेनैवोङ्कारेणैव धनुषा बाणासनेन क-रणेन प्रबोधेन ज्ञानेन 'ॐमित्येतदक्षरमिदꣳसर्वं भूत भवद्भवि-ष्यच्च सर्वमोङ्कार एवे'त्यादिमाण्डूक्योपनिषदुक्तप्रकारज्ञानरू-पेण शरेण च सायकेनापि बाह्यकरणेन तस्य बोधस्य प्रणव-द्वारकत्वात्प्रणवस्य धनुष्ट्व ज्ञानस्य च शरत्व ब्रह्म देशकालव-स्तुकृतपरिच्छेदशून्यमात्मवस्तु लक्ष्यं लक्षितुं योग्य तस्य बो-धबाणस्य लक्षणावृत्त्या विषयत्वाद्वेधार्हमुच्यते श्रुत्येति शेष, कथ्यते । तथा च श्रुति ।

'प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते ।
अप्रमत्तेन वेद्धव्य शरवत्तन्मयो भवेदि'ति ॥

लक्ष्य लक्षणावृत्त्या बोधविषय ब्रह्म देशकालवस्तुकृतप-रिच्छेदशून्यमखण्डसच्चिदानन्दरूप वस्तु विद्धं वेधित बुद्धमित्य-र्थः, न नास्ति चेद्यदि तर्हि तदा धनुर्वेदो धनुरुपलक्षित स-र्वशस्त्रास्त्रप्रयोगाकर्षणज्ञानप्रतिपादक शास्त्र निरर्थको निष्प्रयो-जन इत्यर्थ, तत्र मुमुक्षुविषयाभावादिति भाव· ॥ १ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ मु-नीन्द्रदिनचर्यार्थप्रकाशे पुराणश्रवणनिर्णयार्थप्रकाशेऽष्टादश विद्यास्थाननिर्णयार्थप्रकाशान्तर्गतो धनुर्वेदनिर्णयार्थ प्रकाशो विंश ॥ २० ॥

अथ गान्धर्वनिर्णय ।

एव धनुर्वेदनिर्णयमभिधायेदानी गान्धर्वनिर्णयाख्यमेक-श्लोक प्रकरण निरूपयिष्यन्नाह ।

अथ गान्धर्ववेदनिर्णय. ।

अथेति। अथ धनुर्वेदनिर्णयानन्तर गान्धर्वनिर्णयो गान्धर्वस्य गानज्ञानप्रतिपादकस्य शास्त्रस्य निर्णय सिद्धान्तो मुमुक्षुग्राह्य· क्रियत इति शेष , तमेवाह ।

आत्मा कलेन गीतेन गान्धारेण स्वरेण हि ।
न चेद्गन्धर्ववद्गीतो गान्धर्वेण कृत किमु ॥ १ ॥

इति श्रीनर० बोध० मुनीन्द्र० पुराण० अष्टादश० गान्ध-र्वनिर्णय ॥ २१ ॥

आत्मेति। गान्धर्वेण गन्धर्वकर्मभूतेन स्वरेण जातित्वादेकवचन निषादादिस्वरै कृ वा कलेन मधुरेण गीतेन गानेनात्मा सच्चिदानन्दलक्षणो ब्रह्माभिन्न प्रत्यगात्मा गन्धर्ववत् यथा गन्धर्वा गायन्ति तद्वद्गीतो गीनेन लक्ष्यीकृतो न नास्ति चेद्यदि तदा गान्धर्वेण गान्धर्ववेदाभ्यासेन किमु कृत कि सपादित न किमपीत्यर्थ., आत्मनो व्यतिरिक्तविषयस्य गान्धर्वस्य निष्प्रयोजनत्वात्तदादर परित्यज्यात्मविषयकगान्धर्ववेदमात्र आदरा विधेय इति भाव· ॥ १ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचिताया बोधसारार्थदीप्तौ मुनीन्द्रदिनचर्यार्थप्रकाशे पुराणश्रवणनिर्णयार्थप्रकाशेऽष्टादश विद्यास्थाननिर्णयार्थप्रकाशान्तर्गतो गान्धर्वनिर्णयार्थप्रकाश एकविंश ॥ २१ ॥

अथार्थशास्त्रनिर्णय ।

एव गान्धर्वनिर्णयमभिधायेदानीमर्थशास्त्र निर्णेतुमर्थशास्त्रनिर्णयाख्यमेकश्लोक प्रकरणमारभमाण आह ।

अथार्थशास्त्रनिर्णय. ।

अथेति । अथ गान्धर्वनिर्णयानन्तरमर्थशास्त्रनिर्णयोऽर्थस्य

धनादे साधनभूतज्ञानप्रतिपादक शास्त्रं ग्रन्थस्तस्य निर्णयो मुमुक्षुविहित सिद्धान्त क्रियत इति शेष, तमेवाह ।

अनर्थाः सर्वं एवार्थाः सदर्थः परमार्थदृक् ।
परमार्थो न लब्धश्चेदर्थशास्त्र निरर्थकम् ॥ १ ॥

इति श्रीनर० बो० मु० पु० अ० अर्थशास्त्रनिर्णय ॥ २२ ॥

अनर्था इति । सर्वे लोकप्रसिद्धा धर्मार्थकामाख्या अर्था अनर्था एव दुःखास्पदत्वादर्थशून्या एव केवल ज्ञेया, कस्तर्ह्यर्थ इत्यत आह सदर्थ इति, परमार्थदृक्परमः कार्यकारणरहितो योऽर्थ सद्रूप आत्मा तस्य दृक् ज्ञान तदेव सदर्थः सश्चासावर्थश्च कालत्रयाबाध्योऽर्थ सुखरूपत्वात्प्रयोजनरूपो ज्ञेय स परमार्थ सच्चित्सुखात्मरूपोऽर्थो न लब्धो न प्राप्तश्चेद्यदि तर्हि-अर्थशास्त्रमर्थप्राप्तिसाधनबोधक शास्त्र नीत्याख्य शास्त्रमित्यर्थ, निरर्थकमर्थशून्य ज्ञेयमत आत्मरूपार्थान्यार्थप्राप्तिसाधनबोधकार्थशास्त्र आदर परित्यज्य मोक्षाख्यार्थप्राप्तिसाधनभूतज्ञानोपदेशके वेदातशास्त्र एवादरो विधेयो मुमुक्षुभिरिति भाव ॥ १ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचिताया बोधसारार्थदीप्तौ मुनीन्द्रदिनचर्यार्थप्रकाशे पुराणश्रवणनिर्णयार्थप्रकाशेनऽष्टादशविद्यास्थाननिर्णयार्थप्रकाशान्तर्गतोऽर्थशास्त्रनिर्णयार्थप्रकाशो द्वाविंश ॥ २२ ॥

इति पुराणनिर्णयार्थप्रकाशोऽष्टाविंश ॥ २८ ॥

अथ सायसन्ध्यानिर्णय ।

एवं पुराणनिर्णय सविशेष निरूप्येदानी मुनीना सायसन्ध्यानिर्णयाख्य द्विश्लोक प्रकरणमारभमाण आह ।

अथ सायंसन्ध्यानिर्णयः ।

अथेति । अथ पुराणश्रवणनिर्णयानन्तरं सायंसन्ध्यानिर्णयो मुनीनां सायंकालीना या सन्ध्या सन्ध्याख्यं कर्म तस्या निर्णयः सिद्धान्तो मुमुक्षुविहितः क्रियत इति शेषः, तत्र तावत्पूर्वोक्तदिनाचाराचरणेनोक्तलक्षणदिनस्यान्ते सायं कालप्राप्तिमाह ।

इत्थं ज्ञानविनोदेन वेदशास्त्रकुतूहलैः ।
दिवसं सकलं यातं सायंसन्ध्या समागता ॥ १ ॥

इत्थमिति । इत्थमुक्तप्रकारेण ज्ञानविनोदेन ज्ञानरूपेण विनोदेन परिहासेनोपलक्षितं वेदशास्त्रकुतूहलैर्वेदानामृगादीनां शास्त्राणां न्यायादीनां कुतूहलैरुक्तलक्षणैः कौतुकैः कृत्वा सकलं समस्तं दिवसं दिनं यातं व्यतीतं ततश्च सायंसन्ध्या सायंकालीना सन्ध्या तदुपलक्षितः काल इत्यर्थः, समागता प्राप्ता ज्ञेया ॥ १ ॥

तत्र मुनीनां सायंसन्ध्यां निर्णीय दर्शयति ।

एवमेव कियत्कालं व्यवहारावलोकिनः ।
पुनः समाधौ सन्धानं सायंसन्ध्या हि सा स्मृता ॥ २ ॥

इति श्रीनर० बो० मु० सायंसन्ध्यानिर्णयः ॥ २९ ॥

एवमेवेति । एवमेवानेनोक्तप्रकारेणैव कियत्कालं यावदस्मिन्नुक्तलक्षणे विनोदे रुचिस्तावत्पर्यन्तं कालं व्यवहारावलोकिन उक्तलक्षणं व्यवहारमवलोकयितुं शीलमस्य स तथोक्तस्तस्य मुनेः पुनर्भूयः समाधौ समाधिविषयकं सधानं स्मरणं यद् हि विदुषामनुभवविषया सोक्तलक्षणा सायङ्कालीना सन्ध्या स्मृता कथिता मुनिभिरिति शेषः, उक्तलक्षणव्यवहारोपसंहारात्सायंकालत्वं तस्योपसंहारस्य, उक्तलक्षणदिनसमा-

धिरात्र्योः सन्धिभवत्वादनुसन्धानस्य सन्ध्यात्वं ज्ञेयमिति भावः ॥ २ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीपौ
मुनीन्द्रदिनचर्यायां सायसन्ध्यानिर्णयार्थप्रकाश
एकोनत्रिंश ॥ २९ ॥

अथ निशाव्यवहारनिर्णय ।

एवं सायसन्ध्यां निर्णीयेदानीं मुनीनां निशाकृत्य निर्णेतु निशाव्यवहारनिर्णयाख्य द्विश्लोक प्रकरण निरूपयिष्यन्नाह ।

अथ निशाव्यवहारनिर्णय ।

अथेति । अथ सायसन्ध्यानिर्णयानन्तरं निशाव्यवहारो निशायां रात्रौ यो व्यवहारो व्यवहृतिः कृत्यमित्यर्थः, निर्णीयत इति शेषः, तमेवाह द्वाभ्याम् ।

यातेऽथ व्यवहारनाम्नि दिवसे भुक्ते च सन्ध्यासुखे
जातायां निशि निश्चलेन मनसा दत्वा कपाटार्गलाः ।
पीत्वा संप्रति शुद्धबोधमधुरं क्षीरं यथेष्टं युवा
पर्यङ्के सुसमाधिनामनि मुहुः काञ्चिद्भुनक्ति प्रियाम् ॥ १ ॥

यात इति । व्यवहारनाम्नि व्यवह्रियतेऽस्मिन्निति व्यवहार उक्तलक्षणस्तदेव नाम यस्य तस्मिन्दिवसेऽहनि याते व्यतीते सति, अथानन्तर सन्ध्यासुखे पूर्वोक्तज्ञानिव्यवहार उदासीनतयोपसहृतेऽनन्तरं पूर्वोक्तज्ञानिव्यवहारोपलक्षितदिवसस्य समाध्युपलक्षितरात्रेश्च सन्धिभव यत्पूर्वमुक्तं सन्ध्याख्य कर्म तस्य सुख वासनानन्दापरपर्यायं तस्मिन्भुक्तेऽनुभूते

सतीदमेव सायंभोजनं मुनीनामित्यर्थः, ततो निशि पूर्वोक्त-
व्यवहारार्हपदार्थास्फुरणलक्षणायां रात्रौ समाधिरूपाया रात्रा
वित्यर्थः, जाताया प्राप्ताया सत्यामाविर्भावोन्मुखाया मत्या
मित्यर्थः, निश्चलेन स्थिरीभूतेन मनसा चेतसा कपाटार्गलाः
क सुख पाटयन्ति खण्डयन्तीति कपाटानीन्द्रियाणि तेषाम
र्गलाः शृङ्खलावद्रोधकत्वात्प्रत्याहारलक्षणाः शृङ्खला दत्वा प्र
दाय प्रत्याहार कृत्वेत्यर्थः, इदमेव कपाटबन्धन मुनीना ज्ञेय,
सम्प्रति तात्कालिक तात्कालिकस्यैव दुग्धस्य वैद्यके पौष्टिकत्वो-
क्तेर्वक्ष्यमाणबोधलक्षणस्य पयसोपि तत्कालभवस्यैव मुक्तिहे
तुत्वोक्तेश्च सम्प्रतीत्युक्त, शुद्धबोधमधुर शुद्धो मायाविद्याख्यम
लरहितो यो बोधश्चिद्घन आत्मैव सुखरूपत्वान्मधुर मिष्ट
त्रिविधमायारहित शुद्धात्मस्वरूपसुखमेवेत्यर्थ, क्षीर स्वानुस-
न्धानवता क्षरति स्रवत्यात्मसुखमिति क्षीर पयो यथेष्टमातृप्ति
यथा भवति तथा नि.सशयसाक्षात्कारेण नित्यतृप्तिपर्यन्तमि-
त्यर्थ', पीत्वा प्राश्याहब्रह्मास्मीत्यनुभवमपि स्वस्मिन्विलीये
त्यर्थः, युवा यौवनसम्पन्न आत्मनि स्थैर्योत्साहशक्तिमानि-
त्यर्थ, मुनिर्मननवान् ज्ञानीत्यर्थः, सुसमाधिनामनि सुशो-
भनो निर्विकल्पाख्यः समाधिः स एव नाम वाचकमभिधान
यस्य स तथोक्तस्तस्मिन्पर्यङ्के मञ्चे परितः सर्वतोऽङ्क चिह्नं
सच्चिदानन्दरूप यत्र स्फुरति तत्रेत्यर्थः, काञ्चिदनिर्वचनीया
सत्त्वेन तावन्न निर्वक्तु शक्या 'नेह नानास्ति किञ्चन, अतोन्य-
दार्त्तमि'त्यादिश्रुतिभिर्विद्वदनुभवेन च शक्तिमतः पृथगसत्त्वस्य
शक्तेरनुमितत्वेन च बाधितत्वस्य सर्वत्र शास्त्रेषु दृश्यमानत्वाद्,
न चासत्त्वेन कार्यरूपेण तत्कारणरूपेण चानुभूयमानत्वात् स-
त्त्वासत्त्वयोश्च परस्पर विरुद्धत्वात् काञ्चिदित्युक्त, प्रिया सुख-

रूपत्वादिष्टां प्रीतिविषयामित्यर्थ, भुनक्ति अनुभवति आत्मनः साच्चदानन्दरूपा शक्तिमेवानुभवतीति भाव ॥ १ ॥

तामेव विशेषणैर्निरूपयन्प्राप्त भोगित्व मुनौ निवारयति ।

तन्वङ्गी तरुणी विलासरसिकां चित्ते चमत्कारिणीम्
जाते प्रेमाणि नित्यमेव सुखदामानन्दलीलामयीम् ।
खेलन्तीमुरसि प्रियां निजकलामालिङ्ग्य तत्सङ्गमा
द्भोगीन्द्रत्वमुपागतः सुखनिधिर्योगीन्द्रचूडामणि ॥ २ ॥

तन्वङ्गीमिति । तन्वङ्गी तनु सूक्ष्ममङ्ग स्वरूप यस्या बुद्ध्याद्यगोचराकारामित्यर्थ, तरुणीमात्मपुरुषेच्छानुरूपजगदुत्पादने स्वात्मसुखानुभवे वा सामर्थ्यवयोन्विता विलासरसिका विलासे प्रपञ्चनिर्माणरूपे तल्लयेन स्वात्ममात्रपरिशेषरूपे वा रसिका रसवतीमत एव चित्ते स्वात्मपुरुषोपाधिभूते चेतसि चमत्कारिणी चिदाभासचमत्कारिणी परमार्थतस्स्वात्मरूपाविर्भावलक्षणचमत्कारकारिणी प्रेमाण स्नेहे जाते स्वात्मशक्तिप्रिया या स्वात्मपुरुषचित्तस्नेह उत्पन्ने सतीत्यर्थः, नित्यमेव सर्वदैव सुखदामानन्ददात्रीमानन्दलीलामयीमानन्दः सुख तद्रूपा लीला क्रीडा तन्मयी तद्रूपा खेलती क्रीडन्ती निजकला निजा स्वीया कलामशरूपां प्रियां सुखरूपत्वादिष्टामुरसि परमार्थत स्वाभिन्ने व्यवहारदृष्ट्या तत्कल्पितैकदेशलक्षणे स्वाङ्गविशेष आलिङ्ग्य परिरभ्य स्वाभिन्नामवलोक्येत्यर्थ, तत्सङ्गमात्तस्या उक्तलक्षणमायाशक्तेः सङ्गमाल्लौकिकदृष्ट्या सयोगाद्भोगीन्द्रत्व भोगिन आनन्दमयकोशोपाधिका व्यष्टिजीवास्तेषामिन्द्रत्वमीश्वरत्व प्रेरकत्वमित्यर्थ, उपागत प्राप्तोपि योगीन्द्रचूडामणिर्योगिनो जीवब्रह्मैक्यसाक्षात्कारवन्तो जीवन्मुक्ता बा-

धितप्रपञ्चा इत्यर्थं, तेषामिन्द्रा जीवन्मुक्तश्रेष्ठा ब्रह्मादीश्वरास्ता-स्तेषामप्याधारशुद्धब्रह्मरूपत्वाच्चूडामणिरिव भवतीति ज्ञेय, उभयत्र हेतु सुखनिधिः सुखाना वैषयिकमानुषादिसुखानां बिम्बभूतसुखरूपत्वान्निधिः समुद्र इवाऽतो भोगीन्द्रत्व योगी-न्द्रचूडामणित्वं चोभयमप्येकत्र सम्भाव्यमिति भाव ॥ २ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचिताया बोधसारार्थदीप्तौ मुनीन्द्रदिनचर्याया रात्रिकृत्यार्थप्रकाशोऽय ॥ ३० ॥

अथ मुनीन्द्रदिनचर्याविचारफलनिरूपणम् ।

एवं मुनीन्द्राणा रात्रिकृत्य निर्णीयेदानीं मुनीन्द्रदिनचर्या-फलं निर्णेतु मुनीन्द्रदिनचर्याफलनिरूपणाख्यं त्रिश्लोक प्रकरणं वक्तुकाम आह ।

अथ मुनीन्द्रदिनचर्याविचारफलनिरूपणम् ।

अथेति । अथ रात्रिकृत्यनिर्णयानन्तर मुनीन्द्रदिनचर्याफल-निरूपण मुनीन्द्रदिनचर्यायाः फलस्य प्रयोजनस्य निरूपण प्र-तिपादन क्रियत इति शेषः, तदेवाह ।

मुनीन्द्रदिनचर्येयं चिन्तनीया दिनेदिने ।
न चिराच्चिन्तनेनास्या नरो निश्चिन्तता व्रजेत् ॥ १ ॥

मुनीन्द्रेति । हे शिष्य इय निरूपिता मुनीन्द्रदिनचर्या मुनी-नां मननवता मध्ये य इन्द्राः श्रेष्ठास्तेषां दिनचर्याऽऽह्नि-कनिरूपणप्रकरण दिने दिने प्रत्यहं नित्यमेवेत्यर्थः, चिन्तनी-या विचारणीया भवताऽन्यैरपि मुमुक्षुभिः, नन्वस्या विचारणे-न किं फलन्तत्राह नेति, नरो न राति आदत्ते विषयानिति नरो वैराग्यादिसाधनसंपन्नः पुरुषोऽस्या मुनीन्द्रदिनचर्याया-

श्चिन्तनेन विचारेण न चिराच्छीघ्रमेव निश्चिन्तता स्वात्मनि- स्थिरतां व्रजेत्प्राप्नुयात् ॥ १ ॥

एतत्प्रकरणविचाररीतिनिरूपणपूर्वकमस्या विचारे विशिष्टं फलं निर्दिशति ।

साध्यसाधनसंबन्धफलसंस्कारयुक्तिभिः ।

ज्ञाताया सम्यगेतस्या ज्ञातव्य नावशिष्यते ॥ २ ॥

साध्येति । साध्यसाधनसम्बन्धफलसस्कारयुक्तिभिः साध्यमखण्डैकरस ब्रह्मत्व, साधनानि अस्मिन्प्रकरण उक्तानि रूपकै प्रातःशौचादिपदवाच्यब्रह्माकारवृत्तिरूपाणि, सबन्धश्च तासां वृत्तीनां तत्साध्यस्य ब्रह्मणश्च साध्यसाधनरूपो लक्ष्यलक्षकरूपो वा, फल च समाध्युत्थानसमयेपि उक्तलक्षणव्यवहारेण ब्रह्मात्माविस्मृतिरूप, सस्कारश्चान्त.करण एतत्प्रकरणनिरूपितवृत्त्यनुसन्धानेन ब्रह्मात्माभेदवासनारूपः, युक्तिश्च ब्रह्मात्मनि चेतस स्थिरीकरणरूपाऽविरोधशब्दवाच्या, एताभिः साधनभूताभि' सहैतस्या मुनीन्द्रदिनचर्याख्यप्रक्रियायां ज्ञातायां विचारितायां सत्या ज्ञातव्य विचारणीयमन्यत्किमपि शास्त्रं नावशिष्यतेऽवशिष्ट न भवति सर्वमपि ज्ञात भवतीत्यर्थः, एतत्प्रकरणविचारस्य सर्वशास्त्रविचारफलरूपत्वादिति भावः॥२॥

इदानीं मुनीन्द्रदिनचर्याया मुनीन्द्रवागगोचरत्वनिरूपणपूर्वक स्वस्य तत्र वाचाटत्व क्षमापयति ।

मुनीन्द्रदिनचर्येय मुनीन्द्रैरपि दुर्वचा ।

मम वाचालतां तत्र क्षम्यतां पार्वतीपति. ॥ ३ ॥

इति श्रीनर० बो० मुनीन्द्रदिनचर्याया मुनीन्द्रदिनचर्या विचारफलनिर्णय ॥ ३१ ॥

मुनीन्द्रेति । इय मदुक्ता मुनीन्द्रदिनचर्या मुनयो मनन-

शीला प्रथमादिचतुर्थ्यन्तभूमिकास्थितास्तेषु मध्य इन्द्रा श्रेष्ठा पञ्चम्यादिसप्तम्यन्तभूमिकासु स्थितास्तेषां दिनचर्याऽऽह्निक निरूपणाख्या प्रकरणरूपा मुनीन्द्रैरपि श्रेष्ठमुनिभिरपि दुर्वचा निरूपयितुमशक्याऽस्ति, ननु तर्हि भवता कथ निरूपिता तत्राह ममेति, तत्र मुनीन्द्रदिनचर्यानिरूपणे मम तन्निरूपणा समर्थस्य मे वाचालता वाचाटत्व पार्वतीपतिः पार्वत्याः पतिः स्वामी शिवः क्षम्यतां सहतु पार्वतीपतिरित्यनेन पूर्वजन्मान सत्या दक्षकन्यायाः स्वपितृदक्षाध्वरगमननिवारणजनितकोपेन स्वस्मिन्सतीकृत वाचाटत्वमनुभूयापीह पार्वतीजन्मनि पर्वतस्य जाड्याधिक्येन तत उत्पन्नायाः पार्वत्या अपि जाड्याधिक्यस्यानुमेयत्वात्तन्मूलकस्य वाचाटत्वस्यापि आधिक्येनानुमेयस्य सत्त्वात्तादृशवाचालायाः पार्वत्या अङ्गीकाराच्छिवे वाचालत्वक्षमावत्त्वाधिक्यमस्त्यतो मद्वाचालत्व क्षन्तु योग्य. शिव एवेति भाव' ॥ ३ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ मुनीन्द्रदिनचर्यार्थप्रकाशे मुनीन्द्रदिनचर्याफलनिरूपणार्थप्रकाश एकत्रिंश ॥ ३१ ॥

इति मुनीन्द्रदिनचर्यार्थप्रकाश षोडश ॥ १६ ॥

अथ निरञ्जनपञ्चाशत्कम् ।

एव मुनीन्द्रदिनचर्या निरूप्येदानीमात्मनः सर्वधर्मैरलिप्तत्व साक्षात्कारयितु जिज्ञासूना निरञ्जनपञ्चाशत्काख्य पञ्चाशच्छ्लोक प्रकरणमभिदधान आह ।

अथ निरञ्जनपञ्चाशत्कम् ।

अथेति । अथ मुनीन्द्रदिनचर्यानिरूणानन्तरं निरञ्जनपञ्चाशत्कमुच्यतेऽनेनेत्यञ्जनमुपाधिर्माया सर्वसम्बन्धकारण-

त्वात्स निर्गतो निवृत्तो यस्मात्स निरञ्जनो निरुपाधिक आत्मा तस्य पञ्चाशत्कं पञ्चाशतां पञ्चाशच्छ्लोकानां समूहः पञ्चाशत्कं समूहे कन्,अस्य प्रकरणस्य तत्प्रतिपाद्यात्मनश्च निरूप्यनिरूपकभावरूपः सम्बन्धोऽतोस्य प्रकरणस्याभिधानमपि निरञ्जनपञ्चाशत्कं तन्निरूप्यत इति शेष, तत्रादावेवैतत्प्रकरणस्य प्रामाण्यसिद्ध्यै प्रामाण्यहेतुज्ञापनपूर्वं निरूपयितव्यप्रकरणविषयनिरूपणं प्रतिजानीते ।

यत्र प्रमाणं वेदान्ता अनुभूतिस्तथा सताम् ।
देवो निरञ्जनः सोयं बोधसारे निरूप्यते ॥ १ ॥

यत्रेति । यत्र यस्मिन्देवे वेदान्ता वेदशिरोभागा उपनिषद इत्यर्थः, प्रमाणं प्रमास्ति तथा तद्वत्सतां सदर्थं मोक्षं प्राप्तानां जीवन्मुक्तानामित्यर्थः, अनुभूतिरनुभवो यत्र देवे प्रमाणमस्ति उक्तद्विविधप्रमाणसिद्धः सोऽयं मद्बुद्धिवृत्तिप्रत्यक्षो देवश्चिन्मात्रस्वरूप आत्मा निरञ्जन उपाधिरहितोऽत्रास्मिन्प्रकरणे विविच्य सर्वोपाधिभ्यः पृथक्कृत्य प्रदर्श्यते मुमुक्षूणामनुभवगोचरो यथा भवति तथा प्रकर्षेण निरूप्यत इत्यर्थः ॥१॥

तत्र तावदादौ अज्ञत्वाभिमानरूपोपाधेरात्मानं विविच्य दर्शयति ।

अहमज्ञो न जानामि मामहं कोहमित्युत ।
अज्ञानप्रभवो भाव आत्मा शुद्धो निरञ्जनः ॥२॥

अहमिति । अहमहंभावच्छिन्नश्चिदाभासोऽहं कः—अहं चिद्रूपोऽचिद्रूपो वा ससङ्गो निःसङ्गो वा जीवो ब्रह्म वेत्युतेत्यपि मां मा न जानामि न वेद्मि अतोहमज्ञोऽहमज्ञान्यस्मीत्यनुभवरूपो भावः पदार्थोऽज्ञानप्रभवोऽज्ञानं ज्ञानविरुद्धं

भावरूपमज्ञानमिति लक्षणलक्षितादविद्यापरपर्यायात्प्रभव उ-त्पत्तिर्यस्य स तथोक्तोऽस्ति आत्मा ब्रह्माभिन्नः प्रत्यगा-त्माऽज्ञानस्य तज्जन्याहङ्कारस्याऽहमज्ञ इति भावस्य च प्र-काशकत्वात्ताभ्या भिन्नो निरञ्जन स्वयप्रकाशरूपत्वादज्ञा-नतत्कार्यरूपोपाधेरात्मन्यसम्भवान्निरुपाधिकोऽत एव शुद्धो मायाऽविद्यामलरहितस्तत्साक्षित्वरूपमलरहितश्चाऽस्ति एव स-र्वदा चिन्तनीयमिति भावः ॥ २ ॥

एवमज्ञानतदहङ्काराभ्यां विविच्यात्मान दर्शयित्वा जी-वस्य ब्रह्मविषयकध्येयत्वभ्रमोपाधेरात्मान विविच्य दर्शयति ।

यदियं ब्रह्मविषया जीवस्य ध्येयतामतिः ।
स हि भ्रान्तिमयो भाव आत्माशुद्धो निरञ्जनः ॥३॥

यदिति । यद्या ध्यानिषु प्रत्यक्षेय साक्षिचैतन्यप्रकाश्या ब्रह्मविषया ब्रह्म देशकालवस्तुकृतपरिच्छेदशून्य ब्रह्म शवल त-द्विषयो ध्येयं यस्याः सा तथोक्ता जीवस्य प्राणोपाधिकस्य साधिष्ठानबुद्धिस्थचिदाभासस्य जीवसम्बन्धिनीत्यर्थः, ध्येयता-मतिर्ध्यानविषयत्वनिश्चयरूपा वृत्तिरस्ति तस्या साक्षिप्रका-श्यत्वाद्ब्रह्मणोऽविषयत्वे सति विषयत्वेनाङ्गीकाराच्च तस्मि-न्नेव परमार्थतो ब्रह्मस्वरूपे सति जीवत्वनिश्चयाच्च स उक्तो भावः पदार्थो भ्रान्तिमयो भ्रान्तिरेव केवलमस्ति अतस्त-त्साक्षी—आत्मा ब्रह्माभिन्नो प्रत्यगात्मा निरञ्जनोऽज्य-तेनेनेत्यञ्जनमुपाधिरुक्तभ्रान्तिरूप स निर्गतो निवृत्तो य स्मात्स तथोक्तोऽत एव शुद्धो निर्मलो भ्रान्तिसाक्षित्वमलरहित इत्यर्थः, अस्तीति शेषः, विद्यते एव निश्चेतव्यमिति भावः ॥ ३ ॥

एवमुक्तलक्षण भ्रान्तेरात्मान विविच्य दर्शयित्वेदानी

गुणत्रयात्तत्कृतबन्धनात्तदभिमानाच्चात्मानं विविच्य दर्शयति ।

त्रिभिर्गुणैर्निबद्धोऽहं संसारे संसराम्यहम् ।
इत्याद्याः प्राकृता भावा आत्मा शुद्धो निरञ्जनः ॥४॥

त्रिभिरिति । अहमन्तःकरणस्यान्तरा वृत्तिरहमिति तद्विषयोऽहं तद्वेद्यो ब्रह्माभिन्नः प्रत्यगात्मा परमार्थतः सन्नपि अन्तःकरणविषयत्वेन प्रतीयमानः सोऽहं त्रिभिस्त्रिसङ्ख्याकैर्गुणैः सत्त्वरजस्तमोभिधैर्निबद्धो बन्धनं प्राप्तोऽस्मि अत. सत्त्वगुणबद्धत्वादहं ज्ञानीतिप्रतीतिरहं शमवाञ्जितेन्द्रियो विरक्तो मुमुक्षुरित्यादिप्रतीतिश्च स्वस्मिन्करोति, रजोगुणबद्धत्वादहङ्कामी कर्त्ता लोभीत्यादिप्रतीतिं स्वस्मिन्करोति, तमोगुणबद्धत्वादहमज्ञानी क्रोधी स्तब्ध इत्यादिप्रतीतिं स्वस्मिन्करोतीत्यतस्त्रिगुणबद्धत्वमिति भावः, अत एव संसारे सम्यक्सरति प्रसरतीति संसारः प्रपञ्चोऽज्ञानतत्कार्यरूपस्तस्मिन्नेव संसरामि वर्त्ते ऽहं साधिष्ठानबुद्धिस्थचिदाभासो जन्ममरणादिसंसारमङ्गीकरोमीत्यर्थ, इत्याद्या एवमादय भावा साक्षिदृश्याः पदार्था प्राकृता प्रकृतिसम्भवा प्रकृतेस्त्रिगुणात्मत्वात्तेषां धर्माणां च गुणकार्यत्वमिति ज्ञेयम्, आत्मा तत्साक्षी निरञ्जन प्रकृतितद्गुणतद्बद्धोपाधिरहितोऽत एव शुद्धस्तत्साक्षित्वमलरहितोऽस्तीत्यनुसन्धेयम् ॥ ४ ॥

एवं प्रकृतितद्गुणतत्कृतबन्धनतद्बद्धोपाधिभ्य आत्मानं विविच्य दर्शयित्वेदानीमन्तःकरणचतुष्टयरूपोपाधेरपि तं विविच्य दर्शयति ।

मनोबुद्धिरहङ्कारश्चित्तं चेति चतुष्टयम् ।
अन्तःकरणजा भावा आत्मा शुद्धो निरञ्जनः ॥५॥

मन इति । मनः सकल्पविकल्पात्मिकान्तःकरणवृत्तिः, बुद्धिर्निश्चयरूपान्त करणवृत्तिः, अहङ्कारस्तयोरात्मतादात्म्यप्रतीतिरूपान्त'करणवृत्तिः, चित्त चानुभवप्रत्यभिज्ञास्मृतिधर्मरूपान्तःकरणवृत्तिरित्येव चतुष्टय चतुष्क यदस्ति तत्स भावः पदार्थोऽन्त.करणः पञ्चभूतसत्त्वगुणभागकार्यरूपं द्रव्य तस्माज्जात उत्पन्नोऽन्तःकरणविकृतिरूपो ज्ञेय आत्मा ब्रह्माभिन्न प्रत्यगात्मा निरञ्जनोऽन्त.करणतद्वृत्तिचतुष्कोपाधिरहितोऽत एव शुद्धस्तत्साक्षित्वमलरहितोऽस्तीत्यनुसन्धेयम् ॥ ५ ॥

एवमन्तःकरणचतुष्टयोपाधेरात्मानं विविच्य दर्शयित्वेदानीं मनोवृत्तिभ्योपि त विविच्य दर्शयति ।

यच्च सङ्कल्प्यते पूर्वं सङ्कल्प्य च विकल्प्यते ।
एते मनोभवा भावा आत्मा शुद्धो निरञ्जन' ॥ ६ ॥

यच्चेति । यत्सर्वेषु प्रसिद्ध पूर्व प्रथमत. सकल्प्यत इद समीचीनमिति सम्यक्तया चिन्त्यते तत्सकल्प्य सम्यक्तया विचिन्त्य विकल्प्यते च विपरीतत्वेनासमीचीनत्वेन चिन्त्यतेऽपि एते उक्ताः सकल्पविकल्परूपा भावा विकारा मनोभवा मनसो मनोनाम्न्या अन्त.करणवृत्तेर्भवा उत्पन्ना मनोवृत्तय इत्यर्थः, ज्ञेया आत्मा ब्रह्माभिन्नः प्रत्यगात्मा निरञ्जनो मनस्तद्वृत्त्युपाधिभिन्नस्तदस्पृष्ट इत्यर्थ, अत एव शुद्धो मनस्तद्वृत्तिसाक्षित्वमलरहितोऽस्तीत्यनुसन्धेयम् ॥ ६ ॥

एव मनोवृत्तिभ्योप्यात्मान विविच्य दर्शयित्वेदानीं बुद्धिवृत्तिभ्योप्यात्मान विविच्य दर्शयति ।

इदमित्थमिदनेत्थमिति निश्चीयते तु यत् ।
स हि बुद्धिमयो भाव आत्मा शुद्धो निरञ्जनः ॥ ७ ॥

इदमिति । इदं घटादि द्रव्य पुरो दृश्यमानमित्यमेतादृशं घटादिरूपमेव तथेद रज्ज्वादि द्रव्य नेत्थ नेतादृश सर्पादिरूप नैव भवतीत्येवं यत्प्रसिद्ध निश्चीयते निश्चयेन ज्ञायते स हि स उक्तो हि प्रसिद्धो भावो विकारो बुद्धिभवो बुद्धिजन्योऽस्तीति ज्ञेयम्, आत्मा तत्साक्षी प्रत्यगात्मा निरञ्जनो निर्गत सर्वदा निवृत्तमञ्जन बुद्धितद्वृत्त्युपाधिर्यस्मात्स तथाभूतो ऽत एव शुद्धस्तत्साक्षित्वमलराहितोऽस्तीत्यनुसन्धेयम् ॥ ७ ॥

इदानीमहङ्कारवृत्तिभ्योऽप्यात्मान विविच्य दर्शयति ।

ज्ञत्वकर्तृत्वभोक्तृत्ववध्यघातकतादय. ।

अहङ्कारभवा भावा आत्मा शुद्धो निरञ्जनः ॥८॥

ज्ञत्वेति । ज्ञत्वकर्तृत्वभोक्तृत्ववध्यघातकतादयो ज्ञत्व ज्ञानेन्द्रियव्यापारकर्तृ त्वाभिमानित्व कर्तृत्व कर्मेन्द्रियव्यापारकर्तृत्वाभिमानित्वमेतदुभय विज्ञानमयाभिमानजन्यं, भोक्तृत्वमह भाक्तेत्येवमभिमानित्वमेतदानन्दमयकोशाभिमानवृत्तिः, वध्योऽहमेतस्य वधार्ह इत्येव स्थूलशरीराभिमानित्व, घातकता घातको ह्यमेतस्येत्यभिमानस्तस्य भावस्तत्ताऽऽदिर्येषा ते तथा भूतास्ते सर्वेऽपि भावा विकारपदार्था अहङ्कारादुद्भव उत्पत्तिर्येषा ते तथा भूता ज्ञेया आत्माऽहङ्कारतद्वृत्तिसाक्षी प्रत्यक्चैतन्यरूपो निरञ्जनोऽहङ्कारतद्वृत्त्युपाधिराहितोऽत एव शुद्धस्तत्साक्षित्वमलरहितोऽस्तीत्यनुसन्धेय. ॥ ८ ॥

इदानी चित्तवृत्तिरूपोपाधिभ्य आत्मान विविच्य दर्शयति ।

स्मृति पूर्वानुभूतस्य प्रत्यभिज्ञा च तादृशी ।

एते चित्तभवा भावा आत्मा शुद्धो निरञ्जन· ॥९॥

स्मृतिरिति । पूर्वानुभूतस्य पूर्व पूर्वकाले कदाचिदनुभूतो

नुभवगोचरं कृतो यः पदार्थस्तस्य घटादिपदार्थस्य स्मृतिः स्मरण, तादृशी तद्वत्प्रत्यभिज्ञा चानेकवृत्तिविषयाणामनेकवृत्तीनामेकविषयत्वपूर्वकमेकवृत्तित्वप्रतीतिरिति लक्षणलक्षिता सा प्रत्यभिज्ञाख्या वृत्ति , एताभ्यामनुभवाख्या वृत्तिरपि ग्राह्या, एते स्मृत्यादयो भावाः पदार्था विकारा इत्यर्थ., चित्तभवाश्चित्ताश्चिताख्याया अन्त करणवृत्ते भव उत्पत्तिर्येषा ते तथोक्ता ज्ञेया, आत्मा चित्ततद्वृत्तिसाक्षी प्रत्यगात्मा निरञ्जनश्चित्ततद्वृत्तिरूपोपाधिरहितोऽत एव शुद्धश्चित्ततद्वृत्तिसाक्षित्वमलरहितोऽस्तीत्यनुसन्धेयम् ॥ ९ ॥

एवमन्तःकरणचतुष्टयतद्वृत्त्युपाधिभ्य आत्मानं विविच्य दर्शयित्वेदानी शरीरत्रयतदभिमानिभ्योऽप्यात्मान विविच्य दर्शयति ।

ये विश्वतैजसप्राज्ञा जाग्रत्स्वप्नसुषुप्तिषु ।
अवस्थाभेदजा भावा आत्मा शुद्धो निरञ्जनः ॥ १० ॥

ये इति । जाग्रत्स्वप्नसुषुप्तिषु जाग्रतीन्द्रियैरर्थोपलब्धिर्जागरितमित्युक्तलक्षणाया जाग्रदवस्थायां स्वप्ने च जाग्रदवस्थावत्सर्वेन्द्रियेषु सुप्तौ लीनेषु सत्सु जाग्रत्संस्कारजः प्रत्यय. स स्वप्न इत्युक्तलक्षणाया स्वप्नावस्थाया च सुषुप्तौ च सर्वेन्द्रियाणा स्व कारणाज्ञाने लयेन स्वकारणाज्ञानमात्रत्वमित्युक्तलक्षणायां सुषुप्त्यवस्थायां क्रमेण ये प्रसिद्धा लोके च शास्त्रे च तत्तदवस्थाभिमानिनो विश्वतैजसप्राज्ञा विश्वश्च जाग्रदभिमानी विश्वाभिधस्तैजसश्च स्वप्नावस्थाभिमानी तैजसनामा प्राज्ञश्च सुषुप्त्यभिमानी प्राज्ञनामकः सन्ति ते सर्वेऽप्येतेऽवस्थाभेदजा अवस्थाना जाग्रदाद्यवस्थानां ये भेदा वैलक्षण्यानि सन्ति तेभ्यः

बनारससंस्कृतसीरीजनाम्नी वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्येऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन सग्राह्या तैस्तदेकैकस्य खण्डस्य ।||) मूल्यं प्रापणव्ययश्च =) देयं । अन्यैर्महाशयैर्यैः कानिचित् खण्डानि सग्राह्याणि तैश्च प्रत्येकं खण्डानां १) मूल्यं प्रापणव्ययश्च =) देयं इति ॥

तत्र मुद्रिता ग्रन्थाः ।	रु०	आ०
सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रहः अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १३	१३	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं ख० ६	६	०
साङ्ख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्डानि ४ (प्रथमभागः प्रथमद्वितीयकाण्डे पुण्यराजटीकासहिते खण्ड ३ । द्वितीयभागः तृतीयाकाण्डम् हेलाराजटीकासहितं खण्ड १)	४	०
रसगङ्गाधरः खण्डानि ९	९	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २	२	०
शिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ४	४	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यम्	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ४	४	०
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम् खण्डानि ४	४	०
विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २	२	०
तत्त्वदीपनम् (पञ्चपादिकाविवरणस्य व्याख्यानम्) ख० ८	८	०
वेदान्तदीपः (श्रीभगवद्रामानुजाचार्यविरचितः) खण्डानि ३	३	०
टुप्टीका खण्डानि ४	४	०

पातञ्जलदर्शनम् । श्रीरामानन्दयतिकृतमणिप्रभाऽऽख्यवृत्ति स०	१	०
व्याकरणमिताक्षरा । श्रीमदन्नभट्टप्रणीता खण्डानि ६	६	०
रसमञ्जरी । व्यङ्ग्यार्थकौमुद्या प्रकाशेन च सहिता ख० ३	३	०
भेदधिक्कार व्याख्यासहित श्रीमदप्पयदीक्षितकृत उपक्रमपराक्रमसहित खण्डे २	२	०
बोधसारो नरहरिकृत तच्छिष्यदिवाकरकृतटीकया स० ख० ५	५	०
ब्रह्मसूत्रदीपिका श्रीमच्छङ्करानन्दभगवद्भिरचिता ।	१	०
दैवज्ञकामधेनु अर्थात् प्राचीनज्योतिषग्रन्थ ।	१	०
श्रीमदणुभाष्यम् । श्रीश्रीवल्लभाचार्यविरचितम् । गोस्वामिश्रीपुरुषोत्तमजी महाराजविरचितभाष्यप्रकाशाख्यव्याख्या समेतम् ।	२	०

व्रजभूषण दास और कम्पनी

चांदनीचौक के उत्तर नई सडक बनारस